मन्ये नैतन्मयि युज्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीः ॥ नाथ ! न साम्प्रतं भवान् पर्याकुलो भूयात्। कामम् एष एवास्तामावयोर्वरणीयतम उपायः। भवतो द्रुत-स्वास्थ्यहानिर्नान्यथा स्याद् वारिता।

झान्सी-राज्यं परम-महितं लोककल्याणहेतुः
पिण्डीभूतामिव वसुमतीं यद्वयं चिन्तयामः।
वैदेशिक्या करकलनया स्यादिदं चेद् विपन्नं
धिक् तर्ह्यस्मान् वितथकलित-क्षत्रियत्वाभिमानान् ॥२६॥

मयि जीवन्त्यां न तत् कदापि संभविष्यति।

गंगाधरः ॥ यथा मम सहधर्मिणी मन्यते तथैव वरं मन्ये।

कर्मोत्साहो ज्ञान-भक्ति-प्रकर्षो
विश्वासश्चाप्यद्भुतोऽस्याः स्वशक्तौ।
बालः पुत्रो यद्यजीविष्यदस्याः
कामं जायेतैकराट् क्षत्रियेषु ॥ २७ ॥

अपि विधातुरपि दुरभिसन्धिः ?

लक्ष्मीः ॥ नहि नहि देव ! मा तादृशीं चिन्तां हृदि निदधातु भवान्। विभुः परमशिवः चिरकल्याणमयः। कर्मफलभोगिनो वयं संसार-प्रपञ्चचारिणः।

मोरोपन्तः ॥ मातः ! अतुलनीया खल्वसि त्वम्। एकपुत्रविनिमयेन सहस्र-सहस्र-पुत्रवदनं प्रेक्षस्व। निखिलं विश्वं त्वां मातृ-सम्बोधनेन वीतसन्तापां करिष्यति।

लक्ष्मीदेवी ॥ पितः ! भवत आशिष एव बलम्। (स्वगतम्)

प्राचीन-जन्मार्जितया नियत्या
कामेन धातुः पितुराशिषा च।
पित्रा यदुक्तं मम चेत्तथा स्यात्
स्त्रीजन्म मे सार्थकतां प्रयाता ॥ २८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रमणीजीवनं सन्तति-संवलं जन्मतो रमणी जननी भाविनी।
परिवार-जननी राष्ट्रकल्याणी नित्यं रमणी मंगल-
विधायिनी ॥ २९ ॥

अहो पत्युर्वंशधारा मयाऽवश्यमेव रक्षणीया ; तद्विषयकं विधानं मयाऽवश्यमेवाचिराद् अवलम्बनीयम्।

[इति प्रथम-दृश्यम्]

—: ❀ :—

॥ द्वितीय-दृश्यम् ॥

स्थानम्—झान्सी-राज-प्रासादः।

कालः—१८५३, १९ नवेम्बर प्रभातम्।

(इष्ट इण्डिया कम्पानी प्रतिनिधिसमक्षं
श्रीलक्ष्मीदेवी-गंगाधरयोर्दत्तकपुत्रग्रहणम्।)

[सभास्थले समागता मोरोपन्तताम्बे, चिमाबाई, लक्ष्मीदेवी, प्रधान-मन्त्री नरसिंहरावः, ब्रिटिश-चिकित्सक एलेन महोदयः, पुरोहितः पण्डित-विनायकः, मेजर एलिस् केपटेन मार्टिनो—ब्रिटिशप्रतिनिधी, राजवंशीयः पञ्चमवर्षवयस्क-दामोदरापरनामा आनन्दरावस्तत्पिता, रणजित्सिंहप्रेषिता काचन शिखरमणी, उदयपुराधीशादयः, नानासाहेब-तात्यातोपे-महोदयौ बहवो दर्शकाश्च]

(मोरोपन्तताम्बे प्रधानमन्त्री नरसिंहरावश्च प्रविशतः)

मोरोपन्तताम्बे ॥ (स्वगतम्) अहो न जाने मम कन्याया ललाटे किं लिखितम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वत्सो गंगाधरो मे कथमपि लभते नोपदिष्टोऽपि शान्तिं
संसारस्यास्थिरत्वं विधिवदभिहितोऽप्येष नैति प्रबोधम्।
सम्भाव्यं राज्यहानेर्भयमपि कुरुते सर्वदा व्याकुलं तं
कुर्यान्मे कन्यकायाः कुशलमनुदिनं देवदेवप्रसादः ॥ ३० ॥

(नरसिंहरावमुद्दिश्य) प्रधानमन्त्रि-नरसिंहराव-महोदय ! ब्रिटिश-शासन-प्रतिनिधि-डालहौसि-महाशयस्य सर्वतः स्वसन्तान-हीन-राजन्यस्य राज्यभ्रंशनीतिं संवीक्ष्य नितरामस्मि दुःखितश्चिन्तितश्च। प्रत्याख्येया खल्वेषा दुष्टनीति-र्भारतीय-नीतेः पूर्णविरोधिनी ; किन्तु को वात्र प्रत्याख्यानोपायः ?

नरसिंहरावः। प्रत्याख्यानोपाय इति ? नन्वयम्। (बाहुमुद्यम्य दर्शयति)

अनेन वीर्योन्नत-बान्धवेन
दुरात्मदौर्जन्य-निसूदनेन।
इयं तथाऽन्यापि च वन्यरीति-
र्विदेशिनां वारयितुं सुशक्या ॥ ३१ ॥

अहो ! एलिस् महोदयेन प्रेरितो ब्रिटिश-चिकित्सकवरः एलेन् महोदयः समायातः।

(प्रविशति मिः एलेन)

एलेन। श्रुतं मया यन् महाराजः किल वैदेशिककरदत्तं भेषजं न ग्रहीष्यतीति। अत एव पूत-सुरधुनीजलमिश्रितं भेषजं राज-ग्रहणयोग्यं मया प्रस्तुतम्। आशासे एतदौषधवलेन राजा स्वस्थ्यं पुनरवाप्स्यति।

मोरोपन्तः। न जाने वत्सो गङ्गाधरः किं वक्ष्यति, तथापि तं पृच्छामि।

(प्रस्थितः)

नरसिंहरावः। महाराजस्य स्वधर्मरक्षण-नीतिः प्राणेभ्योऽपि प्रियतरा। सेयमादर्शभूतेत्यत्र नास्ति सन्देहः। अयं हि—

मन्त्रणाप्रमुख-राजकर्मसु व्यापृतो गुरुतमेषु सन्ततम्।
आचरत्यवसरे यदस्खलन् धर्मसंहित-विधिं तदद्भुतम् ॥३२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एलेन। किन्तु प्राणाः सर्वथा रक्षणीया इत्यपि शास्त्रविधिः। पुनः एलिस् महोदयः झान्सीराजहितचिन्तनपरायणो मां विशेषेणानुरुद्धवान् यथा राज्ञो गङ्गाधरस्य जीवितं भवेत् संरक्षितम्।

(पुनः प्रविशति मोरोपन्तः)

मोरोपन्तः। अहो! अस्माभिः पुनः पुनरनुरुद्धोऽपि न गङ्गाधरो वैदेशिकभैषज्यं ग्रहीतुं स्वीकरोति, चिकित्सकवर! किं करणीयम्? भवितव्यता बलीयसी किल।

एलेन। एते खलु धर्मान्धा वरं मरिष्यन्ति, तथापि न स्वमतं त्यक्ष्यन्ति इत्येतन्महदाश्चर्यमेव। (डाः एलेन बहिर्गच्छति)

मोरोपन्तः। अहो! दत्तक-पुत्रग्रहणकृत्यसुसम्पादनाय सर्वः प्रयत्नो विहितः। पुनरेष आनन्दरावः राजवंशोद्भूतो गंगाधरस्यात्मीय एव इत्यपि मोदकारणम्।

नरसिंहरावः। निश्चितम्; अहो! दुरन्ता खलु वैदेशिकानां लोलुपदृष्टिः। "उइलोवी"—प्रपञ्चिता राजमरणानन्तरं पुत्रहीनस्य राज्ञो राज्यस्य ब्रिटिश-कर्तृक-शासनव्यवस्था डालहौसि-महोदयेन स्वसुयोगानुसारं पूर्णतया स्वीकृता।

मोरोपन्तः। अत एव वत्सस्य मे गङ्गाधरस्य प्रयत्नः सार्थक-दत्तक-पुत्रग्रहणाय। अहो! पुरोहितो विनायक-महोदयः समायातः।

(प्रविशति पुरोहितो विनायकः)

विनायकः। (सर्वतो दृष्ट्वा) अहो कर्मकुशलता यजमानस्य! सम्यक्तया समाहृतानि खलु सर्वाण्युपकरणानि दत्तकग्रहण-कृत्यस्य। कस्य नु खल्वेषा वरणीया कृतिः? इयं खलु—

वंशस्तम्भैरुपरि पटलैरावृता दर्भवद्भि-
र्वेदिर्मृद्भिर्विहित-रचना रोचना पत्रपुष्पैः।
हस्तोच्छ्राया वसुकरमिता दैर्घ्यतः प्रस्थतश्च
द्रष्टुर्दृष्टिं हरति हरिता गोमयेनोपलिप्ता ॥ ३३ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अपिच—

काष्ठान्यत्रेह हव्यं समिध इत इतो यज्ञपात्रं स्रुवाद्यं
कुण्डं चैतत् पुरस्तादुपकरणयुतं वर्तते वह्न्यपेक्षि।
दीपोऽयं धूप एष ह्यगुरु-मलयजामोदहृद्यः प्रसर्पन्
पेणेयं चर्मवृन्दं मृदु रुचिरमिदं दृश्यते चासनार्थम्॥ ३४॥

नरसिंहरावः। कस्या इत्युच्यताम्। अत्र सर्वत्रैव सर्वराज्य-वन्दनीयाया महीयस्या राज्ञ्या लक्ष्मीदेव्याः सानुशासनं तत्त्वावधानम् एव निदानम्। तदीयासु कृतिषु नास्ते कुत्रापि स्खलनम्। भवतु, भवद्भिः प्रकृतं कार्यं प्रारभणीयम्।

पुरोहितः। राजदम्पती अत्रानीयेताम्।

मोरोपन्तः। तथा करोमि। (निष्क्रान्तः)

पुरोहितः। प्रधान-मन्त्रिमहोदय! राज्ञः शारीरिक-कुशलताविषये भृशं चिन्तापरायणाः सञ्जाताः प्रजाः सर्वाः।

नरसिंहरावः। वयमपि। तथापि स्वधर्मनिष्ठो राजा कथमपि वैदेशिक-भेषजं न ग्रहीष्यति। पुनश्च, राज्यस्य भविष्यच्चिन्ताप्येनं दन्दह्यमाना अन्तः-शोषं शोषयति।

पुरोहितः। भवतु, अहं प्रकृतं कर्म प्रारभे।

(यथाविधि पूजाद्यनन्तरं वह्निं प्रज्वलयन् स्तौति)

देव हुताशन! विघ्नविनाशन सुखविकाशन एहि रे
संसारतारण विमोक्षकारण मरणवारण एहि रे।
भवभयभञ्जन कालिमगञ्जन नित्यनिरञ्जन एहि रे
पुण्यवाञ्छन शिखालाञ्छन शोकसान्त्वन पाहि रे॥
होमाग्नौ परमे पुण्ये आज्यमेतत् प्रदीयते।
कल्याणं वर्धतां नित्यं दम्पत्योर्दत्तकस्य च॥ ३५॥

(समायातौ राजदम्पती, राजा भृशं क्लिष्टः प्रतीयते। मोरोपन्तादयो राजानं सुखं समुपवेशयन्ति निर्दिष्टासने)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

राजा। (क्लेशखिन्नः) कुत्र "इष्ट-इण्डिया-कम्पेनी"-प्रतिनिधिद्वयं मेजर एलिस्-क्यापटेन-मार्टिन-समाख्यम्।

नरसिंहरावः। भवदागमनं प्रतीक्षमाणौ तौ विश्रामालये वर्तेते। तौ आगच्छत एवेति मन्ये।

(प्रविशति ब्रिटिशराज-प्रतिनिधिद्वयम्)

मेजर एलिस्। राजन्! प्रातर्नमस्कारस्ते।

गंगाधरः। प्रत्यर्पितो भवत्वेष ममापि भवते।

क्यापटेन् मार्टिन। मम च प्रातर्नमस्कारः।

गंगाधरः। भवांश्च मम प्रातर्नमस्कारं गृह्णातु। (स्वगतम्) शोभनं खल्वेतद् यद् एतौ ब्रिटिश-पक्षतः समायातौ। पश्यतां खलु तौ यन्नात्र किमप्य-समीचीनमास्ते, सर्वं विधिपूर्वकं संघटते इति। (पुरोहितमुद्दिश्य) पण्डित-प्रवर! यथाविधि अनुष्ठीयतां दत्तक-ग्रहणविधिः।

पुरोहितः। वाढ़म्। महाराज! भवान् मदुक्तम् अनुवदतु। ब्रवीतु दत्तकस्य पितरं—"महाशय! आवाभ्यां ते पुत्रं देहि"

राजा। "महाशय! आवाभ्यां ते पुत्रं देहि"।

दत्तकपिता। पुत्रस्य महते हिताय तं भवद्भ्यां ददे।

विनायकः। (राजानं पाठयति) "देवस्य त्वा सवितुः प्रसवेऽ श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे"।

(राजा यथोक्त-मन्त्रपाठपूर्वकं बालकं हस्ताभ्यां गृह्णाति).

पुरोहितः। "अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्"।

(राजा "अङ्गादङ्गात्" इत्यादि पठित्वा बालकं दामोदर-नामाङ्कितं कृत्वा लक्ष्मीदेव्याः क्रोड़े ददाति।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गंगाधरः। दामोदर! चिरं जीव, भव च देशस्य कल्याणकारी। (बालकस्य वदने शर्करां ददाति।)

दामोदरः। पितरं वन्दे मातरञ्च।

गंगाधरः। प्रधानमन्त्रिन्! वाञ्छामि ममोत्तराधिकारं लेखन्या निर्णेतुम्। भवतैव लिख्यताम् (कर्णे कथयति, मन्त्री च लिखति)।

गंगाधरः। मन्त्रिवर! अपि लिखितम्?

नरसिंहरावः। यथाकथितं सर्वं लिखितम्, श्रूयताम्। (पठति) "मम राज्यस्य परमहिताय ब्रिटिश-सर्वकारेण सह यदास्ते मम सन्धिबन्धनं तस्य द्वितीय-कलिकामाश्रित्य निष्पादितमिदं दत्तकग्रहणकृत्यम्। मम जीवनावसाने ब्रिटिशसर्वकारं प्रति मम वश्यतां स्वीकृत्य ब्रिटिश-शासनकर्तृपक्षो निश्चितमेव मत्पुत्रं प्रति स्नेहं संप्रकटयेत्"।

गंगाधरः। पुनश्च लिख्यताम्। "मम पत्नी श्रीमती लक्ष्मीदेवी च दत्तकस्य राजपदग्रहणात् पूर्वपर्यन्तं राज्यस्यास्य शासनकर्त्री भविष्यति। ब्रिटिश-सर्वकारः सर्वथा अत्र साहायकं विधत्तामिति मे प्रार्थना"।

(नरसिंहरावः यथोक्तं लिखित्वा पत्रं राज्ञः समीपे आनयति राजा च तत्र स्वाक्षरं ददाति।)

गंगाधरः। विषयेऽस्मिन् मेजर एलिस्-महोदयस्य मतं प्रार्थये।

मेजर एलिस्। भवतो हितकरणाय ध्रुवमेव सर्वः प्रयत्नो मया विधास्यते।

गंगाधरः। मेजर-महोदय! गोयालियर-बुन्देलखण्डीय-राजनीतिभारप्राप्ताय मेजर जि ए म्याल्कम् महोदयायापि पत्रं दास्ये। तत्र विशेषेण १८१७ खृष्टाब्दे विलिखितं सन्धिसूत्रविषयमधिकृत्य लिखिष्यामि। तत्र हि विशेषेण लिखितमास्ते यत् रामचन्द्रराव-महोदयस्य औरस-पुत्रादयः कृतक-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पुत्रादयो वा तदीयोत्तराधिकारिरूपेण ब्रिटिश-सर्वकारस्य सर्वदा स्वीकृतिं साहायकञ्च लप्स्यन्त इति।

मेजर एलिस्। तन्निश्चितं कर्तृपक्षं स्मारयिष्यामि। साम्प्रतं गमनाय याचेऽनुमतिम्।

गंगाधरः। भवतां प्रत्यागमनं प्रार्थये।

(उभौ ब्रिटिश-राजप्रतिनिधी निर्गतौ)

(लक्ष्मीदेवीमुद्दिश्य) प्रिये सहधर्मिणि! श्रान्तोऽहं न भाषणे प्रवर्तिष्ये। मम प्रजा बन्धवश्च सर्वे भाषणमुखेन त्वयैव समादरणीयाः।

लक्ष्मीः। वाढ़म्।

गंगाधरः। केवलं प्राथम्येनागतानां काचन पञ्जी प्रधानमन्त्रि-महोदयेन क्रियताम्।

प्रधान-मन्त्री। निश्चितमेव। (तथा कृत्वा पठति) समागता अद्य— उदयपुर-महाराजः, जगदीशपुर-राजोदयसिंहः, बुन्दिराज, सम्बलपुर-सेनापतिः कमलसिंहः, भोंसला तृतीयः रघुवीरः, आहम्मद-नवाववाहादुरखाँन, फेजावाद-मण्डलीतः आहम्मदसाहः। श्रीनानासाहेब-तातिया-तोपे-प्रभृतीनामुपस्थितिः देवि! भवत्या ज्ञातपूर्वा एव।

लक्ष्मीदेवी। वाढ़म्। (समागतान् उद्दिश्य) प्राणाभ्यधिक-प्रजापुञ्ज! अन्ये च सामाजिकाः! शृण्वन्तु भवन्तः।

यथैतस्मिन् गंगाधर-धरणि-पतौ मत्प्रियतमे
प्रवृत्तं युष्माभिर्भय-विनय-मानादरयुतैः।
तथैतस्मिन्नद्य प्रभृति मम दामोदर-सुते
प्रवृत्तिर्भूयाद् वो निरुपधिरलं मङ्गलमयी॥ ३६॥

अपिच,

अयं यं यं कुर्यात् प्रकृतिहित-कार्ये परिकरं
विधेयं साहाय्यं सहचरतया तेषु सततम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पदक्षेपं कुर्यादपथि यदि मोहात् क्वचिदसौ
प्रबोध्यो युष्माभिर्हितमुपदिशद्भिः सुहृदिव ॥ ३७ ॥

अथ देशहित-साधनविषये किञ्चिदवश्यं वक्तव्यम्।

सत्यं ब्रह्म। सत्यानुसन्धानतत्परं सत्यसन्धं मम राज्यं विश्वस्य विभूषणरूपेण सुचिरं राजताम्। क्षुद्र-स्वार्थादिकं सर्वथा हातव्यम्। देश एव प्राणाः। देशः सर्वस्वम्। मैत्रीसाधना चास्माकं भवतु बलीयसी।

किन्तु देशस्य हितं यः करोति विघ्नसङ्कुलं सोऽनाचारो राष्ट्रकुलाङ्गारः अवश्यमेव शोचनीयः। सोऽवश्यमेव भर्त्सनयोग्यः। यः पुनरात्मप्राणान् देशहिताय उत्सृष्टुं वर्तते समुद्यतः स सर्वेषां पूजार्हः। तदिदानीम्

युष्माकं प्राणतुल्यो धरणिपतिरयं राजभार्याहमेषा
यज्ञीयः पावकोऽयं सुकृत-दुरितयोः साक्षिभूतः पुरस्तात्।
श्रीमन्तो घोषयन्तामिह हि सशपथं कम्बुकण्ठैरुदारै-
र्होष्यामो रक्तबिन्दूनपि रण-दहने जन्मभूरक्षणार्थम् ॥ ३८ ॥

सर्वे। वयम् उच्चैर्घोषयामः—

"होष्यामो रक्तबिन्दूनपि रण-दहने जन्मभूरक्षणार्थम्"

विजयतां महाराजो राज्ञी च। जयो भारतमातुर्जयः। वन्दे मातरम्।

चिमावाई। अत्रान्यदप्यस्ति निवेदनीयम्। पाञ्जाब-केशरि-रणजित्सिंह-महोदयस्य पत्नी चित्तक्लेशानपनेतुं साम्प्रतं वाराणसीधाम्नि निवसति। अस्माकं स्वावलम्बनमूलां कर्मपद्धतिमनुमन्यमाना सा स्ववक्षो-रुधिरपूर्णं पात्रमेकमुपहारविधया प्रेषितवती। तदनेन अस्मिन् गौरवमये दिवसे तस्या आशीर्वादलाभार्थं भाविभूपतेर्दामोदरस्य भाले रक्तरेखां करोमि, यथा सन्तानोऽस्माकं धर्मपथे स्थितो देशमातृसुखं प्रवर्धयेत्। (तथा करोति)

नरसिंहरावः। (स्वगतम्)

यदत्र शुभकर्मणि प्रथममेव रक्तागम-
स्तमेतमशुभोत्तरं समर-सूचकं तर्कये।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

य एष घटनोच्चयः स च न मेऽस्ति मोदावहः
करोतु कुशलं विधिर्नरपतेश्च राष्ट्रस्य च ॥ ३९ ॥
(प्रकाशम्) सफलो भवतु मातुर्मनोरथः ।

सर्वे । जयो जनन्या लक्ष्मीदेव्या जयः ।
जयो जनन्या लक्ष्मीदेव्या जयः ।

लक्ष्मीदेवी । गायकप्रवर कुरु ! श्रीश्रीलक्ष्मीस्तुतिम् ।

नरसिंहरावः । (स्वगतम्) अहो कष्टम्, मनो मे कथयति झान्सीभूमिर्दुःखमेष्यतीति । डालहौसिमहोदयः सुदूर-कलिकातास्थितः पुनश्च राज्य-लोलुपः, महामहीयस्या लक्ष्मीदेव्या गुणगरिममाधुर्यमोहितो न कदापि भविष्यतीति ।

(प्रविशति वैतालिकः)

(श्रीश्रीलक्ष्मीस्तुतिः)

कोजागरी-हिता माता दीपान्वितासुवन्दिता ।
गौरी त्वमसि कृष्णा च रूपद्वय-विराजिता ॥ ४० ॥
शुद्धसत्त्वस्वरूपा त्वं भक्तानुग्रह-विग्रहा ।
राज्य-स्वर्ग-गृहश्रीश्च मिताचार-सुखावहा ॥ ४१ ॥
विष्णु-लक्ष्मीः स्वभू-लक्ष्मीः शिव-लक्ष्मीः सुरार्चिता ।
सर्वदेवमयी लक्ष्मीः कमला कमलाश्रिता ॥ ४२ ॥
करिकर-जलस्नाता कृपामयी सदा हिता ।
शुभप्रस्रवणं देवी नितरां पति-वन्दिता ॥ ४३ ॥

(सर्वे प्रस्थिताः)

(द्वितीय-दृश्यं समाप्तम्)

— ❀ —

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तृतीय-दृश्यम्

(विष्कम्भकः)

[प्रविशति सभामण्डप-तत्त्वावधानकारी कश्चन पुरुषः]

पुरुषः। अहो विचित्रा खलु राज्ञामवस्था! तथाहि

यावत् सिंहासनस्थो भवति नरपतिस्तावदेवैष राष्ट्रे
सर्वेषां मान्य-मान्यस्तिलक इव भुवः शास्ति सर्वान् स्वमत्या।
पश्चात् पुत्रेऽभिषिक्ते वयसि परिणते लीयते तत्प्रभुत्वं
तत्रायं सर्व-कृत्ये स्वसुतमनुगतो जायतेऽन्या प्रजैव ॥ ४४ ॥

राजपत्नी च—

राज्ञाऽप्याज्ञा स्वीकृता मूर्ध्नि यस्या
देवीमन्यां याममन्यन्त सर्वे।
पत्यौ प्रेते स्वाधिकारच्युते वा
प्रेष्यैवान्या जायते सा स्नुषायाः ॥ ४५ ॥

अथवा, संसारस्यैवेदृशी गतिरिति राज्ञां को दोषः?

राज्ञ्या लक्ष्मी-देव्यास्तु अन्यादृशी एवावस्था। तथाहि—

परासुतां गतवति बालकात्मजे
प्रजाप्रिये प्रणयिनि चापि पार्थिवे।
निगृह्य सा द्वयमपि शोक-पावकं
करोति हा व्रतमिव राज्यपालनम् ॥ ४६ ॥

इदानीं राज्यस्यास्य का गतिर्भवितेति महतीयं चिन्ता तामाकुलयति। भारतीय-राज्यानां स्वायत्तीकरणे "इष्ट इण्डिया कम्पानी" प्रतिनिधयः सर्वथा समुद्यता दृश्यन्ते। अत एव—

औरस एवाधिकृतो भवेत् सुतो
राजासने राज्ञि मृते न चापरः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

एवं विधाने ब्रिटिशैः प्रवर्तिते
प्राप्नोतु राज्यं कथमेष दत्तकः ॥ ४७ ॥

अत एवास्य दत्तकस्य राजत्वसिद्ध्यर्थं राज्ञ्या महान् प्रयासः क्रियते। श्रूयते मेजर एलिस् महोदयेन डालहौसि-महोदयस्य मतमद्यैव राजसभायामुद्घोषयिष्यतीति। एतदर्थं सभामण्डपः सुसज्जितः करणीय इत्यादिष्टं लक्ष्मीदेव्या।

पश्यामि तावत् सभासज्जा कृता नवेति। अहो सम्यक् सुसज्जितः सभामण्डपः। तद् राज्ञ्यै निवेदयामि। हन्त! राज्ञी स्वयमेव मन्त्रिमहोदयेन सह इत आयाति। (निष्क्रान्तः।)

तृतीय-दृश्यम्

स्थानम्—झान्सी-राज-प्रासादः।

कालः—१८५४, १८ मार्च, प्रभातम्।

एलिस्-महोदयेन राज्य-हस्तान्तरविषये डालहौसि-महोदयमतस्य विज्ञापनम्।

(राज्ञी लक्ष्मीः प्रधानमन्त्रि-नरसिंहरावः, मन्दार, काशी, मेजर-एलिस्, मोरोपन्त-ताम्बे, मन्त्रिमण्डली च)

(ततः प्रविशति झान्सीराज्ञी नरसिंहरावश्च)

राज्ञी। प्रधानमन्त्रिमहोदय! अहो दुःखं देशमातृकायाः, यस्याः सन्ततयः स्वमङ्गलं न जानन्ति। निजामवाहादुरस्य, होलकारराजस्य "सिन्धिया" भूपतेश्च नास्ते धनाभावो जनाभावो वा। तथापि पश्यतु भवान् कीदृशं बुद्धिमालिन्यमेषां जातम्।

वद्धादराः सततमात्मजनापकारे
भिन्दन्ति ते ब्रिटिश-राजहिताय मन्त्रान्।
कुर्वन्ति चेतसि न जातु—यदर्थसिद्धौ
सद्यः प्रचण्ड-चपटेन पुरस्कृताः स्युः ॥ ४८ ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सिताननानां स्मितहास्यमेते
द्रष्टुं यतन्ते विविधैरुपायैः।
कोपोपरक्तास्तु दृगन्तभागा
नैषां प्रसीदन्ति कथञ्चनापि ॥ ४९ ॥

काशी। प्रियसखि! देशमातृकायास्त्वमसि प्रियतमा कन्या। ततस्त्वमेव भवेर्जनन्या रक्षणकारणम्।

लक्ष्मीः। किन्तु संहतिरेव बलम्। एकाकिन्यहं किं वा कुर्याम्?

नरसिंहरावः। देवि! सत्यं तत्। पलासीयुद्धक्षेत्रे बद्धमूलोऽयं ब्रिटिशशासन-द्रुमः शाखाप्रशाखाभिर्निखिलं भारतं व्याप्नोति। भारतीयानां संहतेरभावात् एते वैदेशिक-शासका देशवासिनां शिरांसि परस्पराघातैर्विचूर्णयन्ति। अहो दौर्भाग्यम्।

मन्दार। सत्यं तथा। किन्तु सूर्योऽपि भवति राहुग्रस्तः, ध्रुवं देशोऽपि कालेन तथा। भवन्तु वा भूयांसो देशवासिनः सुप्ताः, जागरितानां स्वल्पसंख्यकानां तु अवश्य-कर्तव्यं देशस्य जागरणविधानम्।

लक्ष्मीः। निश्चितम्। तत् स्यादविलम्बम्।

नरसिंहरावः। रणजित्सिंहपुत्र-दिलीपसिंहस्य धर्मान्तरवरणं भारतीय-नृपतिवृन्दस्य विलायतरीत्या वचनभङ्गिविन्यासः, पादावलेहनरीत्या-र्थार्जनप्रयासः इत्यादिका दोषा देशमस्माकं सहस्रधा विदारयन्ति। अहो दुरन्तता नियतेः।

मन्दार। किन्तु नार्यो वयं दृढ़सङ्कल्पा वर्तामहे। अस्माकं नेत्री स्वयं राज्ञी लक्ष्मीः। विवादोऽस्मासु कथं पदं कुर्यात्? यदि पुरुषा नास्माकं सहगामिनो भवेयुः वयं स्वयमेव प्राग्रे सरामः। कः शक्नुयादस्माकं गतिं रोद्धुम्?

काशी। बिन्दुबिन्दुजलकणैर्भवति महासिन्धुर्वालुकाकणशतमेलनान्महामरुभूमिः, तृणगुच्छ-शतानां मेलनैश्च महारण्यम्, क्षुद्रा वयं तथापि मेलनाज्जायतां महाशक्तिः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नरसिंहरावः। यद्यपि—

ब्रिटिश-नृपतिभक्ताः केचिदस्मत्सगोत्रा
विदधति सहयोगं कर्मणा तेन तेन।
अशन-वसन-रीतौ वाचि चाप्यन्यदीया-
मनुकृतिमनुसृत्य प्रीतिमन्तो भवन्ति ॥ ५० ॥

तेषामियं प्रणयिता परकीय-भावे
श्रद्धां विलुम्पतितमां स्वसमाजरीतौ।
मायूर-पिच्छपिहिताः करटा इवैते
निन्दन्ति भारतसुतान् निरतान् स्वधर्मे ॥ ५१ ॥

तथापि मातृणां महामेलनेन भवतु देशस्य मुक्तिः। न जाने मेजर एलिस् महोदयः कीदृशीं वार्तामानेष्यति। अये! इत एवासौ आयाति।

(ततो देवी लक्ष्मीः मन्दार काशी च वस्त्राभ्यन्तराले दण्डायमाना-स्तिष्ठन्ति। प्रविशति च एलिस् महोदयः)

एलिस्। नमः झान्सी-राज्ञी-महोदयायै।

राज्ञी। (नेपथ्यात्) नमो भवते।

नरसिंहरावः। मेजर-महोदयाय मम नमः।

एलिस्। मम च भवते राव-महोदयाय।

नरसिंहरावः। महाशय! का वार्ता प्रस्तुतस्य विषयस्य?

एलिस्। महोदय! दूतोऽहं यथोक्तकारी, क्षन्तव्यं ममाप्रिय-भाषणम्। कर्तव्यानुरोधात् एतद् विज्ञापयामि,—कलिकातानगरीत आदेशोऽस्माभिरासादितो यदितः प्रभृति राज्ञ्याः स्वपुत्राभावहेतोः झान्सी-राज्यं ब्रिटिश-सर्वकारेण संशासिष्यते इति।

राज्ञी। अहो दारुणो वज्रनिर्घोषः। सत्यं विज्ञापयामि एलिस् महोदय!

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

यद्यहं शतशः कुट्टिता भवेयं तथापि मम झान्सीराज्यं नाहं कदापि अन्यस्मै कस्मैचन दास्ये।

मन्दार काशी च। जयो जनन्या लक्षीदेव्या जयः।
झान्सीराज्ञ्या जयो जयः।

राज्ञी। एलिस् महोदय! भवतां साहायकं विषयेऽस्मिन् अहं प्रार्थये।

एलिस्। आर्ये! भवद्धितार्थमहं सर्वथा यतिष्ये।

राज्ञी। कृपालुर्भगवान् भवतो मङ्गलं विदधातु।

एलिस्। तद् गच्छामि, नमो भवद्भ्यः।

(एलिस् महोदयो बहिर्गच्छति)

लक्ष्मीदेवी। (प्रधान-मन्त्रिणमुद्दिश्य)—प्रधान-मन्त्रिन्! अतः परं किं किं करणीयं तद् भवता चिन्तनीयम्। (मन्दारमुद्दिश्य) मम पितरमत्राह्वय।

मन्दार। एषाहं गच्छामि। (बहिर्गच्छति)

लक्ष्मीदेवी। मन्त्रि-महोदय! अकारण-पीड़ितान् प्रति नित्य-सदया राजते श्रीश्रीलक्ष्मीदेवी ध्रुवमेव। धर्मपथचारिणो वयं न कथमपि सीदामः। झान्सीवासिनः सर्वे जानन्ति किल यद् राज्यमिदं ममैव। तेषां साहायकं वयं निश्चितं लप्स्यामहे।

(प्रविशति मन्दारसहितो मोरोपन्तताम्बे)

लक्ष्मीः। पितः! श्रुतं भवता ब्रिटिश-सर्वकारस्यानुशासनम्?

मोरोपन्तः। अथ किम्? मातः! प्रागेवानुमितम् इदम् इदानीं पुनः संशय-निरसनं संजातम्। ब्रिटिश-शासकानां स्वेच्छाचारमूलकोऽयं विधिर्नूनं भारतीयानाम् अवमाननकरो धर्महानिकरश्च।

सातत्यं कुल-पिण्डयोरभिलसन् शास्त्रोपदिष्टाध्वना
कुर्यात् कृत्रिम-पुत्रमात्मतनयाभावे यथेच्छं जनः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

योऽयं शास्त्रविधिश्चिरात् प्रचलितो देशे जनैरादृत-
स्तन्मूले ब्रिटिशानुशासनमिदं सत्यं कुठारायते ॥ ५२ ॥

तदिदानीं विशेषेण अस्माभिः स्थिरीकर्तव्यम्—

झान्सीराज्यं जीवनं वा प्रदेयं
प्राप्ते काले शत्रवे मृत्यवे वा ।
एवंभूते जायमाने विकल्पे
कः पक्षः स्यादेतयोरस्मदीयः ॥ ५३ ॥

नूनं वयं पूर्व-पक्षपरिहारेणोत्तर-पक्षमेव ग्रहीष्यामः ।

लक्ष्मीदेवी । पितः ! सुतरामुद्दीपितास्मि भवतोऽनेन उत्साह-वचनेन । सत्यपि वैधव्ये नाहमात्मानमेकान्तदीनं चिन्तयामि । यतो बहूनां प्रजानामहं जननी । (प्रधानमन्त्रिणमुद्दिश्य) भवान् अत्राह्वयतु सर्वान् मन्त्रिमहोदयान् । मन्ये, पूर्वनिर्देशक्रमेण ते सर्व एव बहिस्तिष्ठन्ति ।

नरसिंहः । देवि ! निश्चितम् । (बहिर्गच्छति)

लक्ष्मीः । (पितरमुद्दिश्य) पितः ! भवान् जानातु अद्य प्रभृति तवाहं नवीना कन्या भविष्यामि । झान्सीराज्यं नाहं कदापि परस्मै दास्यामि इति हेतोर्लक्ष्मीरहं श्रीकालिका भविष्यामि ।

मोरोपन्तः । वत्से ! भगवान् तव सहायो भवतु । पुत्रि ! न खलु त्वं व्याकुला भव । वदामि ते किमपि गुह्यम्—

त्वज्जन्मलग्नमधिकृत्य विनिर्मिता या
मौहूर्तिकेन गुणिना शुभ-जन्मपत्री ।
भाग्यं महद् वदति सा तव दुःखमुक्तं
वैषम्यमेतदचिराद् भवितोपशान्तम् ॥ ५४ ॥

मन्त्रिमण्डली । (नेपथ्ये) जनन्यै नमः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीदेवी। सर्वेषां कल्याणं भवतु। किन्तु श्रुतं नु किं, यत् संघटितम्?

मन्त्रिमण्डली। प्रधानमन्त्रिमहोदयसकाशात् किञ्चिदस्माभिः श्रुतम्। निश्चितं वयं भवत्या अभिमतम् अनुसरामः।

राज्ञी। तत् प्रीतास्मि। विधवाऽहं तथापि लक्ष-लक्ष-सन्तान-जननी, माताऽहं न कदापि सन्तानानां दुःखनिराकरणे पश्चाद्वर्तिनी भविष्यामि। कलुषाचाराणां शास्तिरवश्यमेव विधेया। भारतीय-धर्मानुसारेण रीत्यनुसारेण च अहं झान्सीराज्यस्य राज्ञी। मम पुत्रो दामोदरश्च भविष्य-राजा। इतिहास-श्चिरं तत् प्रोद्घोषयिष्यति।

मन्त्रिमण्डली। तत्र कः सन्देहः?

लक्ष्मीः। तत्र यदि केचन वाधां जनयेयुः वयमपि तस्याः प्रतिविधानाय प्रयत्नपरा भविष्यामः। सत्यस्य जयोऽनिवार्य एव।

मोरोपन्तः। मातः! तत् ध्रुवसत्यम्। पश्य पश्य! वहवो जना इत एव प्रागेसरीभवन्ति, वदनानि तेषां मसीपरिवृतानि। अहमेव तेषां सान्त्वनाविधानं करिष्यामि। (प्रस्थानम्)

(अदूरतः)

जयो जनन्या लक्ष्मीदेव्या जयः।
झान्सीराज्ञ्या जयो जयः॥

लक्ष्मीः। (पुरतो गत्वा अधोऽवलोक्य) मम सन्तानवृन्द! न संघटितं किमपि भीतिकारणम्। मम सन्ताना न कापुरुषा इत्यहं जानामि। केवलं यूयं ससज्जा भवत, समुचिते समये साहायक-विधानाय अहं सर्वानाह्वयिष्यामि।

(शनैः शनैः प्रजावृन्दं दूरं याति।)

(मन्त्रिमण्डलीमुद्दिश्य) अद्य प्रभृति अहं भृशं भवतां सर्वेषां साहायक-प्रार्थिनी। जाने भवतां साहायकेनाहं तथा कर्तुं शक्नुयां येन विदेशिभि-

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

रारोपितोऽयं स्वेच्छाचारमूलो विधिश्चिरादुन्मूलो भविष्यति, भारतजननी च वीततापा भविष्यति।

सत्यं लक्ष्मीरहं कालिकातो भिन्नाप्यभिन्ना भविष्यामि। यावन्मम झान्सीराज्यस्याहं सर्वाधिष्ठात्री महाराज्ञी पुनर्न भविष्यामि तावत् कदापि नाहं वेणीबन्धनं करिष्यामि।

नाम्नैका रणरङ्गिणी रणशिरःसञ्चारिणी चापरा
पूर्वा केवलमुद्यतासिरितरा सम्पातितासिर्द्विषि।
एवं भेदजुषोः पुराण-नवयोर्गङ्गाधर-प्रेष्ठयोः
स्यात् काल्या मम चैक्यमद्य समरे मुक्तैकवेणीत्वतः ॥५५॥

(इति केशपाशमुन्मोचयति)

मन्ये सङ्कटकाले समायाते सन्ताना भवन्तो जननीतो दूरे न स्थास्यन्तीति। "झान्सीराज्यसंरक्षणम् अथवा प्राणदानम्" एष एव भवतु भवतां जीवनमन्त्रः। एतद्विषये भवतां मतं याचे।

सर्वे। अत्र वयं सर्व एव दृढ़-सङ्कल्पा यद्वयं प्राणत्यागेनापि झान्सी-राज्यसंरक्षणं करिष्यामः।

देशरक्षां करिष्यामः प्राणैरपि धनैरपि।
दुःसहं दुर्बलोपास्यं धिक् पराधीन-जीवनम् ॥५६॥

श्रीलक्ष्मीदेवी। सन्तानाः, सर्वे शृणुत। वैदेशिक-शत्रु-विताड़न-तत्-परैरपि भवद्भिः नारीनिर्यातनं न करणीयं, कदापि न। शत्रुशिशवोऽपि सर्वथा संरक्षणीयाः। अहञ्च प्रतिजाने प्रजानामनुमोदनक्रमेनैव सर्वयुद्धकर्मस्वहं प्रवृत्ता भविष्यामि।

सर्वे। निश्चितं वयं तथा विधास्यामः। जयो लक्ष्मीदेव्या जयः, जयो मातुर्लक्ष्मीदेव्या जयः।

लक्ष्मीः। आर्य! गायकप्रवर! कुरु देशप्रेमसङ्गीतम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

गायकः। (गायति)

स्वकीयमान-रक्षण-प्रवीणा
करधृत-शाणित-कृपाणा।
दूरीकृत-चारु-कनक-भूषणा
पिधेहि वर्म वसनं रे ॥ ५७ ॥
भेरी-भीषण-रणन-लसना
गगन-दोलित-गैरिक-केतना।
असि-पाश-शूल-वर्शा-शोभना
रणाङ्गने रङ्गिणि विराज रे ॥ ५८ ॥
स्कन्ध-दोलित-कुटिल-कुन्तला
वक्षोज्वालित-वल-वीर्यानला।
कठोर-वीक्षण-कीर्ण-गरला
भव मरण-पण-समरा रे ॥ ५९ ॥

(सर्वे निष्क्रान्ताः)

(समाप्तं तृतीय-दृश्यम्)

—: ❀ :—

चतुर्थ-दृश्यम्

स्थानम्—राजप्रासाद-निकटवर्ति लक्ष्मीमन्दिरम्।

कालः—१८५७, ९ जुन, मध्याह्नः।

[लक्ष्मीसमाराधनरता लक्ष्मीः, पुरोहितः, मोरोपन्तताम्बे, क्याप्टेन-गर्डनस्य भारतीय-सचिवः, मन्त्रिणः प्रजावृन्दञ्च]

लक्ष्मीः। मातः कमलासने रक्तकमलवर्णे! वात्याविक्षुब्ध-विपत्समुद्रे निमज्जितास्मि। तत् सूचय मातः! कस्मिन् पथि मम क्षेमम्?

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देवि लक्ष्मि ! हरसि दुःखमर्पित-बहुपूजना
धर्मशास्त्र-मर्म तद्विदमस्ति हि मम धारणा ।
स्वीकुरु मम कुसुमाञ्जलिमीश्वरि ! विहितार्चना
सुमुखी भव कमले मयि तृप्तिविकसदानना ॥ ६० ॥
त्वमसि जननि ! न हि केवलमञ्चित-मणिकाञ्चना
कलयसि पुनरमितवीर्यमर्पित-सुतसान्त्वना ।
वसतिभूमिरद्य तु तव शात्रव-कृत-शासना
क्लेशमसममेति विषममुज्झित-शुभवासना ।
इयमापदि मज्जति तव वीत-कुशल-नन्दना
॥दवय दुःखमापय सुखमुद्धर कृत६१-वन्दना ॥

लक्ष्मीः । मातः त्रिदिशपक्ष-सैन्यदलयोर्वाम-दक्षिण-संज्ञां परिकल्प्य पित्रा मे स्थिरीकृतं यत् तव विभूषणपुष्पाणां प्रथमं पुष्पं यस्माद् भागात्-वामतो दक्षिणतो वा पतिष्यति तदनुसारेण वयम् एकतरपक्षं ग्रहीष्यामः इति । देवि ! पुरोहितेन भृशं पुष्पविमण्डितासि, तज्जननि, कृपया दर्शय मे समीचीनं पन्थानम् ।

[हठात् सर्वतो ज्योतिःस्फुरणम्—लक्ष्मीदेव्या उभय-कर्णतः पुष्पद्वय-क्षरणञ्च ।]

सर्वे । अहो उभय-कर्णाभ्यां पुष्पपतनं जातम् ।

मोरोपन्तः । (विषण्णः) अहो उभयतः कर्णतटात् पतितं पुष्पमिति किमस्माभिः समाधेयम् । अहो देवि ! एवं वयं केवलम् अप्रतिभाः कृतास्त्वया ।

(विचिन्त्य) भवतु, प्रजापुञ्जो जानाति किल स्वीयं हितम् । तस्य मतम् अवश्यमेव समासादनीयम् । (लक्ष्मीमुद्दिश्य) मातः कल्याणि लक्ष्मि ! यतो भगवत्या लक्ष्मीदेव्या मतं स्पष्टतया न सूचितम् अतएव विपदस्माकं सम्मुखीना इत्यत्र कः सन्देहः ? अत इदानीं यथा त्वया पूर्वं प्रतिज्ञातं तदनुसारेण प्रजापुञ्जस्य मतमवश्यमेव ग्रहणीयम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सौभाग्यात् अत्र वर्तन्ते प्रजाप्रतिनिधयः सर्वे। यदि ते वैमत्यं न स्यात् अहं तेषां मतं पृच्छामि।

लक्ष्मीः। पितः! कृपया तथा क्रियताम्।

मोरोपन्तः। प्राणप्रिय-सन्तानाः! अवधानं दत्त, यत इदानीं गृह्यमाणं समाधानम् भविष्यति सुदूरप्रसारि। एकतो विद्रोहिसैन्यदलम् अन्यतो ब्रिटिशसर्वकारः—उभयोर्विरोधो झटिकावर्त इव भारतवर्षं प्रकम्पयति। तदिदानीं किमस्माभिः करणीयम्?

कश्चन नागरिकः। विषयेऽस्मिन् मातृमुखात् किञ्चित् श्रोतुमिच्छामः।

लक्ष्मीः। भवतां परिज्ञातं किल, यत् यत् फतेपुर-वाराणसी-प्रभृति-स्थलेषु ब्रिटिशपक्षीयैः कृतम्, तथा च हिन्दु-महम्मदीय-सैन्यनिवहैर्वङ्गेषु मिराट्-दिल्ली-प्रभृतिस्थलेषु च। झान्सी-नगर्यामपि अधर्मं यल्लुब्धकैः सैन्यैः कृतं तदर्थमहं भृशं लज्जे। सौभाग्यात्तेऽद्य स्थानादस्माद्दूरं गताः। आशासे ते पुनरत्र नागमिष्यन्ति। इदानीं कठोरा चिन्ता मां दहति—भविष्यति अस्माभिः कः पन्था अनुसरणीय इति। मा नाम द्वन्द्व-प्रतिद्वन्द्वाभ्यां मम राज्ये अराजकत्वं पदं कुर्यात्।

पुनः प्रतिजाने, युष्माकं मतमेव मम सुदृढं मतं स्यादेव। इदानीम् असङ्कोचं युष्माकं मतं वक्तव्यम्।

क्याप्टेन् गर्डनस्य भारतीय-सचिवः। झटिति एव निश्चितं कमिशनार-महोदयाय सन्देशः प्रेषणीयः यत् तेषां कृते एव राज्ञीमहोदयया ब्रिटिशकर्तृपक्षीय-राज्यशासनभारः सामयिकभावेन परिगृहीतः इति। पुनः सैन्यदलस्यात्याचार-विषयेऽपि विवरणं राज्ञीमहोदयया सम्प्रेषणीयमिति।

कश्चन। एतं प्रस्तावम् अहं समर्थये।

सूत्रधरसङ्घप्रधानः पूरणः। एष प्रस्तावः कदापि न परिग्रहणीयः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्राप्तं विलोपं यदि देशतोऽस्माद्
भाग्येन वैदेशिक-शासनं नः।
स्वेच्छानुसारेण पुनः कथं तद्
यतामहे प्रापयितुं प्रतिष्ठाम् ॥६२॥
आनयामः कथं भूयो गतं ब्रिटिश-शासनम्।
कण्ठतो गलितं पाशं कः सुस्थो धारयेत् पुनः ॥६३॥

(सभास्थ-जनाः कर्णाकर्णिकया वक्तुरभिप्रायम् अनुमोदमाना दृश्यन्ते।)

पूरणः। अहं स्थिरमुद्घोषयामि—विषयस्यास्य

प्रस्तावको वाथ समर्थको वा
नैकोऽपि मुक्तो लघु-दासभावात्।
किमन्यथा शासनमन्यदीयम्
एतौ जघन्यं वत कामयेते ॥६४॥

अन्यस्य शासनमेव न वयं काङ्क्षामः, न सैन्यदलस्य नवा ब्रिटिशस्य। वंशपरम्पराप्राप्ताधिकाराया राज्ञी-महोदयायाः शासनमेव केवलं स्वीकुर्मो नान्यत् किमपि। वयं पुनरपि तामेव प्रतिज्ञावाणीम् उच्चारयामः—

देशरक्षां करिष्यामः प्राणैरपि धनैरपि।
दुःसहं दुर्वलोपास्यं धिक् पराधीनजीवनम् ॥६५॥

तैलव्यवसायि-प्रतिनिधिः। एतदेव अस्माकमपि मतम्। दौर्भाग्यं यद् गतं तन्न पुनराह्वानीयम्। परम-कृपामयी जननी स्वयमेव राज्य-शासन-भारं परिगृह्णात्विति प्रार्थना।

समीचीनतया येभ्यो रोचते मामकं मतम्।
उत्थापयन्तु सभ्यास्ते करमेकैकमात्मनः ॥६६॥

(पूर्व-प्रस्तावक-समर्थकौ विना अन्ये करानुत्तोलयन्ति।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मोरोपन्तः। तद् भवतां सर्वेषां वचःसारांश एष—"गर्डन-महोदय-पक्षतो यः प्रस्तावः कृतः स मूल्यवानपि त्याज्यः। सभामतेन राज्ञी लक्ष्मीदेवी स्वयमेव राज्यभारं परिगृह्णातु" इति।

सर्वे। वाढ़म् वाढ़म्। तत्रैव केवलमस्माकं शिवम्।

(श्वेतवस्त्र-मुक्ताहारविमण्डिता राज्ञी प्रजाभ्य आनन्दं विज्ञापयति हरिद्राभ-महाराष्ट्र-जातीय-पताका च समुत्तोल्यते।)

लक्ष्मीः। अद्य प्रभृति मम देशवासिभिः समयलेशोऽपि न वृथा क्षेपणीयः। देशस्य स्वातन्त्र्यं तदैव संघटते यदा सर्वे देशवासिनः पूर्णजागरिता वर्तन्ते। सुप्तेषु देशवासिषु राजते कलिकालः। सत्य-पथस्थिताः सत्याचरणकुशला वयं चिरं सत्ययुगे वत्स्यामः।

अस्तं गच्छतु दुर्जनैकदयितो दुष्टः कलिर्देशतः
प्रत्यागच्छतु सत्यमत्र सुजनोपास्यं सतां क्षेमकृत्।
स्यादत्र व्ययितो वृथा न समयो दान्ता भवन्तु प्रजा
आलस्य-व्यसनादयः कु-रुचयो गच्छन्तु निर्वासनम्॥६७॥

(सर्वे प्रस्थिताः)

(समाप्तं चतुर्थ-दृश्यम्)

—: ❀ :—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पञ्चम-दृश्यम्

स्थानं—झान्सी-राजप्रासादः।

कालः—प्रभातम्।

(नवनियुक्त-प्रधान-मन्त्रिणा लक्ष्मणराव-महोदयेन सह सेनापति-जवाहर-सिंहस्य कथोपकथनम् राज्ञ्या अकुण्ठ-प्रशंसनं च।)

(लक्ष्मीदेवी, मोरोपन्त-ताम्बे, प्रधान-मन्त्री लक्षणरावः, प्रधान-सेनापतिः जवाहर-सिंहश्च)

(ततः प्रविशति प्रधान-मन्त्री लक्षणरावः तथा च प्रधान-सेनापतिः जवाहरसिंहः)

प्रधानमन्त्री। (स्वगतम्) अहो! परम-विपत्सङ्कुले काले राज्ञ्याऽहं झान्सी-राज्यस्य प्रधान-मन्त्रिरूपेण वृतोऽस्मि। (प्रधान-सेनापतिमुद्दिश्य) प्रधान-सेनापते जवाहर-सिंह महोदय, श्रूयतां, स्वल्पावसरे प्रार्थये—भवानस्य नियोगस्य सार्थक्यं प्रमाणीकरोतु।

पश्यतु भवान् कर्मकुशलताम् अस्माकं महाराज्ञ्या लक्ष्मीदेव्याः। तया खलु

राज्यान्तः प्रसृतो निरासि निखिलो भेदश्चिरात् सञ्चितः
शत्रुभ्यः समुदेष्यती प्रशमिता भीतिः प्रजानां हृदः।
राजन्यैर्ब्रिटिशान् द्विषद्भिरनिशं सन्धिः सुसम्पादितो
भीमा काचिदनीकिनी च घटिता स्वाधीनता-दीक्षिता ॥६८॥

प्रधान-सेनापतिः। प्रधानमन्त्रिलक्षणराव महोदय! मन्मते राज्ञ्याः श्रेष्ठं दानं देशं प्रति साधारणजनानां प्रेमोत्कर्ष-सम्पादनम्, राज्य-स्वातन्त्र्यं सर्वेषामेव प्राणेभ्योऽप्यधिक-काम्यं जातम्।

प्रधानमन्त्री। इयमस्माकं राज्ञी नितान्त-धर्मपरायणा प्रतिदिनं घण्टात्रयमाह्निकादिकृत्येन यापयति। देशशासनव्यापारे तस्या दृष्टिः

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सम्प्रदाय-निरपेक्षा, देश-स्वातन्त्र्य-संरक्षण-व्यापार-निबद्धा च। पश्यतु प्रधान-सेनापतिमहोदयः! तस्या अस्त्रागाराध्यक्षो महम्मदीयः खोदावक्सः।

प्रधानसेनापतिः। दुःखमेतद् ईदृश-महामहीयसी राज्ञी सततमुद्वग्ना जीवनमतिवाहयति। तथाहि—

> अन्तः संस्तभ्य शोकं पतिविरहभवं साकमश्रूद्गमेन
> व्यापारान् राजकीयान् बहुगुरु-विषयान् साधयत्यस्ततन्द्रा।
> कालेनाल्पेन दुष्टानपि दमितवती दातिया-राजमुख्यान्
> भ्रातुष्पुत्रञ्च राज्ञो व्यजयत सबलं तञ्च कारामनैषीत् ॥६९॥

प्रधानसेनापतिः। राज्ञ्या दातियाराजादीनां पराजयानन्तरं राजभ्रातुष्पुत्रस्य सदाशिवस्य कारासम्प्रेषणानन्तरञ्च साम्प्रतं युद्धं प्रचरति अर्चाराज्ञ्या लड़्हीवाई-महोदयया सह। तस्याः सेनापतिर्नाथेखानः स्वयं युद्धक्षेत्रे समुपस्थितो दृश्यते। तन्मया रणसज्जाग्रहणाय भूयोऽपि वंशीनादो विधीयते।

प्रधानमन्त्री लक्ष्मणरावः। अहो योधपुराम्बर-परिधाना नीलदेहावरणा शिरोभूषण-भूषिता राज्ञी पित्रा सह इत आयाति। तस्याः कटीतटे भाति कोटिसूर्यसमप्रभ-पद्मराग-मणिविभूषितः क्षुद्रासिः। गलदेशे लम्बते मुक्ताहारः, करयोश्च हीरकवलये, क्षुद्राङ्गुलौ च बृहदङ्गुरीयकम्। अहो सर्वजन-पूज्या-तुलनीया जननी, या अहर्निशं देशहितसाधनरता अशन-शयनादिकमपि त्यक्तवती।

(ततः प्रविशति यथोक्त-वेशभूषिता राज्ञी स्वपित्रा सह, अन्यतः प्रविशन्ति युद्धसज्जिता योधाः)

सेनापतिः। राज्ञ्यै नमो नमः!

प्रधानमन्त्री। जनन्यै नमः।

राज्ञी। सेनापति-महोदय! भवतो हस्ते बध्नामि पीतसूत्रेण रक्षां यतो भवान् अवश्यमेव विजयं लप्स्यते।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

सेनापतिः। एषोऽसिर्मम कृतज्ञताचिह्नरूपेण भवत्याः पादान्तिके संस्थाप्यते राज्ञि।

राज्ञी। सेनापते!

अलमिह फलहीनैर्दीर्घ-दीर्घैर्वचोभिः
समय उपनतोऽयं केवलं कर्म कर्तुम्।
असिरुपहृत आस्ते पादयोर्मे त्वया य-
स्तदयमरिवधार्थं दीयते तुभ्यमेव ॥७०॥

अपि च

स्पृष्ट्वा तदेनं क्रियतां प्रतिज्ञा
'कार्या मया नास्य विमानने'ति।
घोरेऽभियुक्तः समरेऽरिभिस्त्वं
प्राणान् परं त्यक्ष्यसि नासिमुष्टिम् ॥७१॥

सेनापतिः। नमोऽस्तु भवत्यै। राज्ञ्या आदेशः कार्यकाले प्रमाणी-कर्तुं यतिष्ये।

राज्ञी। सेनापति-महोदय! मन्मते यदा शत्रुसेना दुर्गसमीपे आगच्छेत् तदैव खुदावक्सः "कड़ाकविजलि" समाख्यमाग्नेयास्त्रं व्यवहरेत्, न ततः वर्म्।

सेनापतिः। देवि! तथा निर्देशो मयाऽवश्यमेव विधातव्यः॥

(ससैन्यः सेनापतिर्बहिर्गच्छति)

राज्ञी। प्रधान-मन्त्रिलक्ष्मणराव महोदय! एतदेव दुःखकारणं यत् सति ब्रिटिशराजे महाशत्रौ भारतवर्षे, वयं देशवासिनः सर्वे परस्पराघातपरायणाः स्व-स्व-शक्तिं विनाश्य ब्रिटिशराजस्य अभिलाषपूरण-कारणं भवामः। पुनर्गृहशत्रव इन्दोर-गोयालियार-सिन्धिया-होलकारादयो गृहस्य छिद्रादिकम् एतेभ्यः परमशत्रुभ्यो निवेद्य महाचित्तप्रसादं लभन्ते। अहो परमदुर्भाग्यं देशमातुः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रधानमन्त्री। सत्यमाह देवी। विभीषणप्राया गृहशत्रवो मीरजाफरादय एव देशस्य ध्वंसकारणम्। क्षुद्र-व्यक्तिगत-स्वार्थसंपूरणार्थं देशस्य स्वार्थान्धा जनाः काञ्चन दुष्टां सुरञ्जितां नीतिमाश्रित्य दीर्घ-दीर्घं लपन्ति, ते एव प्रधानशत्रवो देशस्य, न बहिरागता जनाः। देवि! तातिया-तोपे-नानासाहेब-प्रभृति-देशप्रेमिकाणां पराजयः कदापि न संजनिष्यते। यदि देशीया जना एतेषां सन्धानं गुप्तकृत्यादिकञ्च शत्रुभ्यो न ज्ञापयेयुः।

लक्ष्मीदेवी। सत्यं तदेव दुःखकारणम्। प्रधानमन्त्रिमहोदय! तत एव श्रीश्रीसीतायाः श्रीश्रीराधायाः श्रीश्रीविष्णुप्रियायाश्च भूतले नरविग्रहधारणम् अश्रुनिषेकैः सन्तानानां पापकालुष्यविदूरणार्थम्। भवितव्यता बलीयसी। कर्मणि अधिकारोऽस्माकम्, फलप्रदाने प्रमाणं जगज्जननी स्वयमेव।

मोरोपन्तः। मातः! त्वयि जगति विद्यमानायां देशस्य का चिन्ता? जगज्जननी सर्वं मङ्गलं विधास्यति।

प्रधानन्त्री। आर्य! प्रार्थयामहे तथैव भवतु।

(बहिर्देशाद् योधाः सर्वे 'जयो लक्ष्मीराज्ञ्या जयः' ध्वनिं कुर्वन्ति)

लक्ष्मीदेवी। अहो मया झटिति युद्धस्थानं गन्तव्यम्। पितः! प्रणामाञ्जलिं गृह्णातु मे भवान्। अहो मधुरमेतद् युद्धयात्रासङ्गीतम्।

(प्रविशति गायन् देशभक्तः। सर्वे दण्डायमानाः तिष्ठन्ति)

(युद्धयात्रा-सङ्गीतम्)

चलत रे रणभूमिं प्राणपणम् ॥७२॥
ऊर्ध्वे विश्वधात्री निम्ने जन्मदात्री।
शृणुत तयोराकुलाकुलाह्वानम् ॥७३॥
वेदिरियं पञ्चमुण्डी राजतेऽत्र रणचण्डी।
विधात्री प्रचण्ड-पाषण्ड-दल-दम्भशातनम् ॥७४॥
हुङ्कारैरातङ्ककरैः खण्डय शङ्कां शुभङ्करे।
ब्रह्माण्डं कथमकाण्डे दैन्यदीर्णं सर्वेश्वरे ॥७५॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दूरीकुरु जगद्धात्रि ! कलिकल्मष-दूषणम् ।
सुमङ्गलेत्र कुरु नित्यममृत-वर्षणम् ॥७६॥
पञ्चम-दृश्यं समाप्तम् ॥०॥

——

षष्ठ—दृश्यम्

झान्सीराज्ञीमहोदयया नारी-सेनावाहिनी-संघटनम् ।

स्थानम्—झान्सीराजप्रासादः ।

कालः—प्रभातम् ।

[राज्ञी लक्ष्मीः, चिमावाई, मन्दार, काशी, प्रधानमन्त्रिलक्ष्मणरावपत्नी भापोट्करपत्नी च]

(प्रविशति लक्ष्मीः)

लक्ष्मीः । जननि ! आयातु भवती । एहि भगिनि मन्दार—एहि त्वं सखि काशि च । सर्वासामागमनं मम परमानन्दजनकम् ।

(सर्वासां प्रवेशः)

चिमावाई । (सस्नेहम्) वत्से ! त्वां हर्षोच्छलितां दृष्ट्वा नितरामानन्दाप्लुताऽस्मि । सन्तानानन्दो वै मातुरानन्दः । वत्से ! चिरमीदृशमानन्दं लभस्व । दुर्योग-घनघटा देश-भाग्याकाशं करोति मेदुरम् । प्रार्थये ! तस्याश्छाया न करिष्यति तव जीवनं तमोवृतम् ।

मन्दार । (सहास्यम्) प्राणप्रिये सखि ! कथं समुल्लासस्तव ? साम्प्रतं देशहित-चिन्तया वदनं तव नित्य-क्लिष्टं पश्यामि, तस्य विपर्ययोऽद्यास्माकं प्रभूत-सुखाय ध्रुवम् ।

बीजप्ररोहो मरुभूमिभागे
क्षारोदधौ स्वादुपयःप्रवाहः ।

CC-O. Prof.,Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

वने विशीर्णे कलकण्ठनाद-
स्तवैष हर्षश्च समो मतो नः ॥७७॥

काशी। अहो सखि! सुष्ठु कवित्वमयं तव वचः। (लक्ष्मीमुद्दिश्य) किन्तु को नाम व्यापारस्त्वां प्रोच्छलयति तज्जिज्ञासे।

लक्ष्मीः। (सावेगम्) शृणु! मम मस्तक-कोटरे कश्चन नवीनभाव-पक्षिसावकः समुपजातः।

काशी। स साम्प्रतमुड्डयन-रहित इति मन्ये।

मन्दार। तथापि प्रचुर-प्राणशक्तिसंवलित इति ध्रुवम्।

लक्ष्मीः। मातः! काशि, मन्दार! सर्वा यूयं शृणुत। देशरक्षार्थं काचन नारी-सेनावाहिनी मयाऽवश्यमेव निर्मातव्या।

सर्वाः। (समस्वरम्) नार्यः कुर्युर्युद्धम्?

लक्ष्मीः। सत्यमेव तथा। अहो! प्रधानमन्त्रिपत्नी भापोटकरपत्नी अन्याश्च काश्चन समागताः। सर्वासामागमनं भवतु चिर-शुभम्।

सर्वाः। महाराज्ञ्यै नमः।

लक्ष्मीः। सुस्वागतम्।

भापोटकरपत्नी। अपि अस्मदागमनेन विहिता महाराज्ञ्याः कार्यक्षतिः? रहस्यालापे दत्ता वाऽस्माभिर्बाधा?

लक्ष्मीः। शान्तं पापम्! संलाप एष भवतीनां कृते एव। मातः अस्माकमभिप्राय आसां भवतु गोचरीभूतः। भवती अनुगृह्णातु।

चिमावाई। शृणुत भगिन्यः सर्वाः। देशहितोन्मत्ता ममेयं कन्यका भृशं वाञ्छति—नारीसेनावाहिनी काचन देशसंरक्षणायाऽवश्यमेव घटयितव्येति।

काशी। अहो मह्यं भृशं रोचते प्रस्ताव एषः। पुरुषा अस्मान् मन्यन्ते बलहीनाः। किन्तु भारतीयेतिहासे योद्धॄणामभावो न परिलक्ष्यते। तासामेव वंशधरा वयम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मणरावपत्नी। तत्र कः सन्देहः। युद्धविशारदा भूत्वा वयं स्वराज्य-संरक्षणार्थमवश्यमेव यतिष्यामहे।

भापोटकरपत्नी। सत्यमेतत्। तथाऽप्यवश्यमेव स्मर्तव्यं यद् वैदेशिकः शत्रुर्भृशं दुर्दान्तः नवाविष्कृत-शस्त्रादिव्यवहारकुशलश्च। तस्मादस्माकं सैन्यरचना संख्यया विद्याकुशलतया च यथा कदाचन हीना न भवेत् तथा यतितव्यम्।

मन्दार। निश्चितम्। सुदीर्घकाल-पराधीनताहेतोः देशस्य पुरुष-समाजोऽपि जातो बलवीर्यहीनः। पुनः का कथा नारीणाम्?

काशी। सत्यम्। युद्धविद्याऽवश्यमेव शिक्षाधीना। का भवेदस्माकं शिक्षयित्री?

चिमावाई। वत्से! तद्विषये चिन्ता न करणीया। इयमस्माकं परमादरिणी दुहिता युद्धविद्यायां परमनिष्णाता। कुसुमकोमलाऽपि सा वज्रकठोरा भवितुमर्हति। सा युष्मान् सर्वा युद्धविद्या-निष्णाता अचिरेणैव करिष्यति।

लक्ष्मीः। स्नेहप्रचोदितं खलु मातुर्वचः। तथापि प्रयोजनवशादहमेव भविष्यामि शिक्षिका।

भापोटकरपत्नी। ततो भवती भविताऽस्माकं सर्वाधिनायिका सर्वथा।

सर्वाः। को वात्र सन्देहः?

लक्ष्मणरावपत्नी। अस्या वाहिन्या नाम च भवेद् राज्ञ्या नाम्नैव "राज्ञी-लक्ष्मी-नारीसेनावाहिनी"ति।

सर्वाः। अहो रमणीयं नाम। जयो झान्सीराज्ञ्या जयः, जयो झान्सी-नारीवाहिन्या जयः।

लक्ष्मीः। राज्ञ्या जयात् प्राक् सर्वाभिरुच्यताम् झान्सीराज्याधिष्ठात्र्या देवताया महालक्ष्म्या जय इति।

सर्वाः। जयो महालक्ष्मीदेव्या जयः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीः। तद्भवतु श्रीलक्ष्मीदेव्या नाम्नैव वाहिन्या नाम "श्रीलक्ष्मी-नारी-सेनावाहिनी"ति।

चिमावाई। (सस्नेहम्) तथा भवतु मातः। महालक्ष्मीरस्माकं स्वर्गलक्ष्मीः, त्वमसि अस्माकं प्रत्यक्षजाग्रल्लक्ष्मीः। ततः का नाम विप्रतिपत्तिस्तत्र।

(सर्वासां हास्यम्)

मन्दार। अहो आनन्दः! देशजनन्याः सेवाभारं संप्राप्य वयं जाता धन्यधन्याः। अहो देशजनन्याः सम्मानरक्षार्थं लब्धोऽस्माभिरद्य युद्धक्षेत्रे प्राणत्यागाधिकारः!

चिमावाई। वत्से! मङ्गलसमयेऽस्मिन् नामङ्गलवार्ता भाषणीया। परन्तु सोल्लासं सर्वाः कुरुत युद्धयात्रासङ्गीतम्।

(सर्वा गायन्ति)

(युद्धयात्रासङ्गीतम्)

चलामश्चलामो जननी-प्राणा
महायुद्धदक्षा झान्सी-ललनाः।
जनन्याह्वान-जागरितजीवना-
श्चलामः सर्वा देशैकसाधनाः ॥७८॥
सुसज्जा भवत धर्म्ययुद्धमनोझान्सी-ललनाः।
महालक्ष्मीकृपा-निरन्तरध्याना देशभक्तिधनाः ॥७९॥
सत्यैक-स्थिर-शिरस्त्राणा
धर्मैकवर्म-चारुभूषणाः।
वीर्यैकासि-पाणि-शोभना-
श्चलामः सर्वा मोक्षैककामनाः ८०॥

(सुसज्जा भवत—इत्यादि।)

भावनावलोकित-जननीवदना
असिधनुर्बाण-भीषणभूषणाः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मृदुल-पवन-माधुर्यलसना-
श्चलामः सर्वाः प्रेमैकभावनाः ॥८१॥
(सुसज्जा भवत—इत्यादि ।)
जनन्यालोक-जनितोद्दीपना
जनन्यानन्द-नित्यवर्धनाः ।
जननीस्नेहामृत-पूरितजीवना-
श्चलामः सर्वा ऐक्यैककामनाः ॥८२॥
(सुसज्जा भवत—इत्यादि ।)
(गायन्त्यो निष्क्रान्ताः)

षष्ठ-दृश्यं समाप्तम् ॥०॥

—❀—

सप्तम-दृश्यम्

[हरिद्रा-कुङ्कुमोत्सव-पालनव्यपदेशेन राज्ञ्या लक्ष्मीदेव्या नारीसमाज-प्रोद्बोधनप्रयत्नः]

स्थानम्—प्रासादस्थ-सभागृहम् ।
कालः—अपराह्णः ।

(नार्यः सर्वाः श्रीलक्ष्मीस्तुतिं कुर्वत्यो देव्याश्चतुष्पार्श्वेषु परिभ्रमन्ति ।)

(सङ्गीतम्)
देशधात्रि महामाये कमले कमलासने ।
अस्मिन् राज्ये चिरं तिष्ठ महादेवि वरप्रदे ॥८३

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कमलासन-निहितचरण-कमले कमलास्ये
सन्ततिजनमापय धनमासय तव दास्ये।
विमलं कुरु मानसमुरु-भक्ति-विभव-वश्ये,
क्षिपतु न पद्मध्वनि तव सन्ततिरुपहास्ये ॥८४॥

(सर्वा लक्ष्मीदेवी-मण्डपपार्श्वे राज्ञीं पुरतः कृत्वा उपविशन्ति)

चिमावाई। परम पवित्र-"हरिद्राकुङ्कुमोत्सव"-दिवसोऽयम्। परस्परं वयं हरिद्राकुङ्कुमाभ्यां गात्राणि रञ्जयिष्यामः, यथाऽस्माकं भवेदशेषं शम्।

झान्सीपुराधिष्ठात्री देवी महालक्ष्मीः सर्वेषामद्य करोतु मङ्गलम्। रूपाधिष्ठात्री देवी सा दूरीकरोतु सर्वां नग्न-कदर्यताम्, प्रकाशयतु च तस्याः सौन्दर्यमनवद्यम्। धनाधिष्ठात्री देवी सा विनाशयतु विश्व-दैन्यं, संप्रकटयतु च स्वीयं तुलनाहीनमैश्वर्यम्।

(सर्वाः प्रणमन्ति)

लक्ष्मणरावपत्नी। देवि! एष एवास्माकमानन्दो यत् प्रायेण समग्रो देशो यदा वैदेशिक-करतलगतो जातः, तदापि देवी अस्माकं झान्सीराज्य-स्वातन्त्र्य-संरक्षणाय कठोरं यतते। लक्ष्मीमातुराशीर्वादाद् राज्ञी लक्ष्मीरपि सर्वथा युद्धार्थं सुसज्जेति।

भापोटकरपत्नी। राज्ञी अस्माकं युद्धविद्या-विशारदैः सह दुर्गप्राचीर-परिखादिकं स्वयमेव निरीक्षते।

द्वारं दुर्गस्य शीर्णार्गलमिदमिदमप्यन्तजीर्यत्कवाटं
प्राचीरस्यैष भागः शिथिल-विरचनः स्रस्त-लेपस्तथाऽयम्।
अन्तःसंक्रान्तपङ्का वहति न परिखा स्रोतसा तोयधारां
जीर्णत्वाद् दारवीया बल-वहनविधौ संक्रमा न क्षमन्ते ॥८५॥
एवं सा प्रतिकूल-सर्वविषयानुत्प्रेक्ष्य तीक्ष्णेक्षणा
तान् दूरीकुरुते विशेषविदुषा तत्तत्-कलाशिल्पिना।
इत्येवं विहितो यथा परिकरो राज्ञ्या तथा मन्यते
युद्धेऽस्मद्विजयो ध्रुवं करगतः स्याच्चेन्न वामो विधिः ॥८६॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्दार। अहो अतुलना खल्वियं स्नेहसर्वस्वा भग्नी नः। अन्वर्थं खलु तस्या नाम।

काशी। प्रिये भग्नि! उक्तं त्वयाऽवितथं वचः।

लक्ष्मीराज्ञी। भवतीनां स्नेहानुराग एव मम परम-सम्बलम्। भगवती लक्ष्मीश्च केवलाशास्थलम्। धर्मपथे वर्तामहे वयम्। तत आशासे भगवती लक्ष्मीदेवी स्वयमस्माकमुद्धारकत्री भविष्यतीति। तदिदानीम्—

दुर्गप्राकारशीर्षे दिशि दिशि निभृतं नालिका दीर्घलक्ष्या
स्थाप्यन्तामग्निचूर्णाचित-गुरुजठरा गोलगर्भा विशालाः।
बाणान् बाणासनानामुपरि निदधतः सादिनः शीघ्रहस्ताः
प्राकारान्तश्चरन्तु प्रतिभटभयदाः स्वेषु कृत्येष्वतन्द्राः ॥८७॥
सर्वत्र प्रचरन्तु गूढ़पुरुषा जानन्तु पौराशयान्
रक्ताः के नृपतौ रिपौ च सुतरां के वा विरक्तास्तयोः।
गूढ़ं संलपतोर्मिथस्तरुणयोराकारचेष्टेङ्गितै-
र्भावं हृद्गतमुद्धरन्तु सततं चारप्रथा हीदृशी ॥८८॥

लक्ष्मणरावपत्नी। लक्ष्मी देवी राज्ञ्या लक्ष्म्या माध्यमेनैव वरदान-परायणा भविष्यतीति कः सन्देहः।

लक्ष्मीदेवी। प्रधानमन्त्रिपत्नि! श्रूयताम्। सौभाग्यं ध्रुवमेतद् यन्नारी-सेनावाहिनी अस्मद्राज्ये संघटितेदृशी यस्यास्तुलनं नास्तीति मन्ये। सत्यं हायदरावादराज्य-सेनावाहिनी अस्मत्तुलनया अकिञ्चित्कर्यैव। आशासे मम नारीसेनावाहिन्या एकैका काले स्वयं सुभद्रायिष्यत इति।

भापोटकरपत्नी। आर्ये! विषयविशेषेऽस्मिन् पर्यालोचनाऽस्माकं प्रागेव संघटिता। तथापि संशयो मे न लुप्यते। तत् पृच्छामि—

दृष्टान्तीक्रियते रणैकरसिकां वक्तुं हि नारीद्वयी
भद्रा सा मनुजासु कृष्णभगिनी देवीषु काली च सा।
किं नासीद् रणकृद् दिवेऽथ भुवि वा काचित् तृतीया तयो-
र्या चक्रे परचक्र-मर्दनकृते लोकोत्तरं सङ्गरम्? ॥८९

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीदेवी। कथं नासीत्? भ्रवमासीदेव। परं तासां संख्या तु नितान्त-स्वल्पा।

प्राचीने वैदिके काले वध्रिमत्यथ विस्पला।
उलूपी परतश्चासीन्महाभारत-विश्रुता ॥९०॥
सुभद्राया न योद्धीत्वं तादृशं दृश्यते क्वचित्।
सारथ्यमर्जुनस्याग्रे तस्याः केवल-कौशलम् ॥९१॥

किन्तु एतासां नामानि श्रुति-स्मृति-पर्यवसितानि। साम्प्रतं चाक्षुषं जातं नारीणां युद्धविद्याकुशलं रूपम्। तस्मात् प्रतीयते—नार्यो न केवलं गृहकर्त्र्यः ताः पुनः समाजकर्त्र्यः देशरक्षित्र्यश्च। शिक्षाप्रभावात् सर्वं सम्भवत्येव।

यथोचितां चेदुपयन्ति शिक्षाम्
इमा रमण्यो गृह-कोटरस्थाः।
गृहीयितुं सङ्गर-चत्वरेऽपि
क्षमास्तदा ता नियतं भवेयुः ॥९२॥

शिक्षाप्रभावेन सर्वं संभवति।

लक्ष्मणरावपत्नी। देवि! सत्यमेव वीरसुतानां जनन्यः स्वयमेव वीरा भवेयुरिति।

लक्ष्मीदेवी। अस्माकं देशे घोर-तामस-युगावसानाय भगवत्याः श्रीकालिकायाः पुनः पुनरुद्भवो जायते। तथाहि देवी प्राह—

"इत्थं यदा यदा बाधा दानवोत्था भविष्यति।
तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम्" ॥

चिमावाई। वत्साभिः परिज्ञायताम् यद् इयमस्माकं पवित्र-जन्मभूमि-र्धर्मस्य पराभवं कदापि न स्वीचकार। धर्मस्य पराजयः पवित्रे भारतवर्षे-ऽद्यापि न संघटिष्यते, युगप्रयोजनेनैव युगत्रातृप्रादुर्भावोऽपि भविष्यत्यनिवार्यम्।

भापोटकरपत्नी। या कालिकादेवी सैव जननी लक्ष्मीः। अस्माकं युगे तु लक्ष्मीवाईरूपं धृत्वा जनगणसमक्षं विराजते, सर्वान् विघ्नान् सैव निराकरिष्यति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मन्दार। भगिन्यः! यूयं भवत निर्भयाः। मातृहेतोः प्राणत्यागः सन्तानानां वरणीयतमो धर्मः। प्राणत्यागनामकं महाव्रतमेवास्माभिः परिगृह्यते। तत् सर्वा नार्यो दण्डायमानास्तिष्ठन्तु हिमाचलवद् उन्नतैः शीर्षैः, भवन्तु प्रज्वलिता मार्तण्डवत् प्रचण्ड-दीप्त्या, धावन्तु जीवनपथे झञ्झा-वायुवद् दुर्दम-गत्या, विस्फारिता भवन्तु पारावारवद् भीमगर्जनोत्तालतरङ्गभङ्गैः।

लक्ष्मीदेवी। (भगवतीं लक्ष्मीदेवीं प्रणम्य)।

सर्वक्षेमविधात्री त्वं सर्वबुद्धिप्रसाधिनी।
नियुङ्क्ष्व स्वेच्छया लक्ष्मीं पुत्तलीमिव सूत्रधृक् ॥९३॥

(भापोटकरपत्नीम् उद्दिश्य) माता एव सर्वम्। जले स्थले नभो-नीलिमनि हिमाचल-गौरीशृङ्गशिखरे प्रशान्तमहासागरातलतले वा या काचन शक्तिः—जगतः सृष्टौ रक्षणे संहारे वा या शक्तिः—तासां सर्वासां शक्तीनां समाहारः सैका मूलाधारभूता जननी श्रीदुर्गा-कालिका-लक्ष्मीनामभिः परिकीर्त्तिता।

मातरि दृढभक्तयश्चेद् भारतीया भवेयुस्तर्हि सर्वद्वन्द्वद्वेषादीन् अतिक्रमितुं क्षमेरन्; तदतिक्रमणेन च संहति-बलेन बलीयांसो भूत्वा नचिरेणैव पराधीनता-पाशं छेत्तुं भवेयुः समर्था इति ध्रुवम्।

भापोटकरपत्नी। अभ्यधिकं मधुसंलापं भवत्याः श्रोतुमिच्छामः।

लक्ष्मीः। मातृजातिः पुनः पुत्रकन्यानां प्रधानप्रचोदनादात्री।

कन्याजनन्यादि-विभिन्नभावान्
आसादयन्त्यो जनुषा रमण्यः।
तातात्मज-स्वामि-सहोदरादीन्
उत्साहयन्ति स्वविधेय-मूढान् ॥९४॥

अतुलनीयाः खलु भारतीय-सन्ताना ये भगवत्सत्ताविषये विवदमाना अपि मातुर्गरिष्ठताविषये निःसन्देहा वर्तन्ते। तस्मान्मातृजातेः पुनः सम्यग उद्बोधन एव आस्ते भारतवर्षस्य क्षेमम्।

भारत-स्वातन्त्र्यं मातृजातिसमुन्नतेः पूर्णापेक्षि, पुनस्तत्रासते केचन स्वजन-द्रोहपरायणाः क्षुद्रस्वार्थान्वेषिणो जनाः। ते एव भयकारणम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

हरिद्रा-कुङ्कुम-दिवसोऽयं झान्सी-राज्यवासिनां भवतु सत्यम् आनन्द-प्रकर्षजनकः।

लक्ष्मणराव-पत्नी। राज्ञि! तव बहवो नारीप्रजाः बहुमूल्योपहारहस्ताः परमोत्सुका अपेक्षन्ते।

लक्ष्मीः। ता अत्र आनय। तानि वस्तूनि पुनर्यथास्थानं रक्ष, देशमातुः सेवाग्नौ तानि हव्यरूपेण समर्पयिष्यामः।

लक्ष्मणराव-पत्नी। (बहिर्गत्वा पुनः कतिपय-नारीप्रजाभिः सह प्रविश्य) मातः! इयं गुलाम-गुष्खानपत्नी, अस्याः स्वामी भवत्या सर्वाग्नेयास्त्रादीनां प्रयोगकर्तृपदे स्थापितः।

इयञ्च खुदावक्स्-पत्नी। खुदावक्स्-महोदयः पुनः भवत्याः पदातिक-सेनापतिपदे अधिकृतो वर्तते।

लक्ष्मीः। तौ द्वौ मम परम-विश्वासभाजनं स्वस्वकर्मसु परम-सुदक्षौ च।

काशी। (प्रविश्य) मातः! काचन प्रौढ़ा विधवा पुनर्विवाह-वासनया भवतीं चतुःशत-मुद्रा याचते।

लक्ष्मीः। अहो विचित्रोऽयं वृत्तान्तः। अपि ज्ञायते कस्तस्या अभिप्राय इति?

काशी। एवं हि तया कथितम्—

सर्वे समर्थाः समरे रमन्ते
स्त्रियः पुमांसो यवना द्विजा वा।
प्रौढ़ाऽसमर्था स्वयमित्यतोऽहं
कृत्वा सहायं पतिमद्य योत्स्ये॥९५॥

लक्ष्मीः। तां द्रष्टुमिच्छामि।

काशी। (तया सह पुनः प्रविश्य) इयं सा।

लक्ष्मीः। (प्रौढ़ामुद्दिश्य) नेदं वयः पुनर्विवाहयोग्यम्।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्रौढ़ा। किन्तु देवि! देशसेवायां प्राणदानाय कश्चन सहकर्मी सहधर्मी वा मया अपेक्ष्यते।

लक्ष्मीः। अहो बुद्धम्। तत् पञ्चशतमुद्रा एव ग्रहणीयाः।

(प्रौढ़ा निष्क्रान्ता।)

भापोटकर-पत्नी। देशवासिनां सर्वेषां जातिधर्मनिर्विशेषं महामेलनं भवत्या स्थापितम् प्रभूत-जनजागरणञ्च विहितम्। एतत्फलेन निश्चितमेव भारतवर्षस्य महामुक्तिः संघटिष्यते। मातृमुक्तिः सन्तान-कठोरसाधनापेक्षिणी!

लक्ष्मीः। जातीय-संहतिः भ्रातृणां परस्पर-द्रोहनिवृत्तिश्च प्राथम्येनापेक्ष्यते। "मीरजाफर" प्रकृतयः सर्वत्र वर्तन्ते, तत्रैव भीतिकारणम्।

अहो! दुरवस्था वाराणसीधाम्नि प्रोषितायाः पाञ्चावकेशरि-रणजित्सिंह-पत्न्याः! एकतः सिंहासनहीनता, अन्यतश्च गृहीत-धर्मान्तरस्य पुत्र-दलिपसिंहस्य धर्महीनता। एतद्द्वयं तस्या मनसि शल्यायते।

पानाशनादि-व्यापारेष्वपि पर-हस्तक्षेपणं सर्वथा असहनीयम्। ततश्च जातो निखिले भारते महान् असन्तोषः, विशेषतः सेनावाहिन्याम्।

अहो! अधर्म-महिषासुरस्य भीषण-शृङ्गास्फालनम् पादाटोपश्च। प्रयोजनं साम्प्रतं श्रीकालिकाया योगिनीकोटि-परिवृतायाः। यूयं मातरः सुसज्जा भवत।

भापोटकर-पत्नी। वयं सुसज्जा एव वर्तामहे।

जयो लक्ष्मीदेव्या जयः।

(समाप्तं सप्तम-दृश्यम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अष्टम-दृश्यम्

[झान्सीदुर्गे लक्ष्मीदेव्या मरणपण-संग्रामः]

स्थानम्—झान्सीदुर्गाभ्यन्तरम्।

कालः—प्रत्यूषः, १८५८, २ एप्रिल।

[दुलाजिठक्कुरः दुलाजिसहचरः लक्ष्मीदेवी नारीयोद्धृः काशी मन्दार लक्ष्मणरावपत्नी प्रवीण-युद्धनेता भापोटकरपत्नी च]

(प्रविशति दुलाजिठक्कुरः।)

दुलाजि। स्वार्थपरवशं सर्वं जगत्, अत एव स्वराज्य-संरक्षणार्थं राज्ञी यथा यतते तथा ब्रिटिश-प्रतिश्रुतस्य ग्रामद्वयस्य लाभार्थं मयापि सङ्केतेन दुर्गगात्र-दुर्बलांशो ब्रिटिश-सेनापतेर्गोचरीभूतः क्रियते।

कृतज्ञस्य कृतघ्नस्य भेदं कुर्वन्ति शाब्दिकाः।
न तु स्वार्थपराधीना मादृशाश्छान्दसा इव ॥९६॥

यातु झान्सी, यातु राज्ञी—तेन मम किम्? इयं नारी लक्ष्मीः कथितवती "झान्सीं मम न दास्यामी"ति! अयि अबले, तव स्वर्गस्थः पितामहो दास्यति।

अहो ग्रामद्वयस्य कर्ताहं भविष्यामि, शतशो जना ममाज्ञानुवर्तिनो भविष्यन्ति, ब्रिटिश-सर्वकारकृपया भविष्यामि चाहं राजा। ततो मम पत्नी अपि लक्ष्मीवत् राज्ञी भविष्यति। क्रमेण सर्वम् उत्तर-भारतवर्षं भविष्यति पदानतं विविध-गुणभूषितानां मम पुत्रपौत्रादीनाम्। अहो आनन्दः!

(उच्चैर्हसति।)

तन्निश्चितमेव यथास्वीकृतं सर्वं करिष्यामि। पुनः, यद्यपि त्रिघटिकावादनत एव ब्रिटिशसैनिकाः सर्वे सुसज्जिता वर्तन्ते तथापि मम निर्देशाभावात् ते न प्राग्रेसरा भवन्ति। तत् लोहितालोकदर्शनेन सङ्केतं दास्ये (तथा करोति।)

अहो मदीय-सहचरस्योपदेशानुसारेण सर्व एव दूरे आसते। सौभाग्यात् सहचरो मम इत आयाति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(प्रविशति दुलाजिसहचरः ।)

सहचरः । अये महामानववरोत्तम ! राज्यश्रीस्त्वां ध्रुवमचिरात् पतिरूपेण वरिष्यति । सुसज्जा राजकन्या च त्वदर्थमित एव धावतितराम् । दुलाजि ततश्च ठक्कुरः—अहो नाम्नः सौन्दर्यम् ! सर्वथा त्वं पतिठक्कुरोऽसि । पत्न्या नर्मसहचरो भव ।

दुलाजि । निश्चितमेव भविष्यामि । राजसुखभोगो मम भाले लिखित आस्ते, कतमः श्यालकः किं करिष्यति ?

सहचरः । अहो ! किमेवं प्रलापं भाषसे ? किं न पश्यसि यत् हिउरोज-महोदयस्य सैनिका इत एवायान्ति ?

दुलाजि । अहो तत् सुखाय मे ।

सहचरः । (भीतिं नाटयन्) किन्तु भ्रातः ! प्रचण्ड-प्रकाण्ड-विड़ालचक्षुषः अर्धखण्डित-प्रलम्बगुम्फा राजतं "राजटम्" इति रारटयमाना वणिङ् मानदण्डं राजदण्डतां प्रापयन्तो ब्रिटिश-सैनिका इत एवायान्ति । शृणु मे भविष्य-वाणीम्—

निकृत्तार्धकूर्चा विड़ालाक्षवंश्या
वलक्षाङ्गलक्ष्म्या विलक्षीकृतास्याः ।
त्रिवर्गप्रवीणा इमे भारतस्य
चतुर्वर्गहानिं करिष्यन्ति काले ॥९७॥

तस्मादहं "स्थानत्यागेन दुर्जनम्" इति सुभाषितं बहुमन्यमानः झटिति स्थानादस्मात् पलाये । (धावन् निष्क्रान्तः ।)

दुलाजि । अहो ! राज्ञीसकाशे ब्रिटिश-कूटचक्रिणां निर्देश-क्रमेण प्रेरितं पत्रं किमपि फलं न प्रासूत । यदि राज्ञीमहोदया तत्पत्रानुसारेण प्रधानमन्त्रि-लक्ष्मणराव-शस्त्रागाराध्यक्ष-कालुवक्स-प्रभृतिभिः सहागमिष्यत् नूनं सर्वे वन्दिनोऽचिरान्निहताश्चाभविष्यन् । ततो मम महत्तरं सुखमभविष्यत् । किन्तु मम बन्धोः "लालतावाद"स्य उर्वरमस्तिष्कभावनामपि सा पराजयत । तथापि आशा-कुहकिनी मां कथयति—ललाटे मम राजसुखमास्त इति ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(इतस्ततो विलोक्य) अहो ! प्रधानाग्नेयास्त्र-विस्फोरकस्य गोलाम-गुम्खानस्य प्रचण्डो विक्रमः। वोनास्-डिक्-फक्स-सेनाध्यक्षा एकेनैव हताः। हन्त ! लङ्केश्वरी मन्दोदरी इत एव आयाति। (एकान्ते स्थितः।)

[ततः प्रविशति दूरवीक्षणकरा लक्ष्मीः। सा उच्चैर्वंशीध्वनिं करोति प्रविशन्ति च नारीयोद्धारः।]

(पताकावन्दना-सङ्गीतम्)

देशमातृप्राण-दीप्तशिखा गैरिक-पताका
पूत-होमाग्नि-सौवर्णलेखा-भूषित-मस्तका।
भव विभुपाद-नित्यप्रसादिका ॥९८॥

घन-तमोविलोपकारिणी अनन्तदीपनी।
तव दीप्तिमाला विश्वोद्भासिनी।
मैत्री-विस्तारिणी शान्ति-प्रीति-निर्झरिणी।
भवतु नो वक्षोबल-विवर्धिनी
जीवन-पात्रामृतपूरणी ॥९९॥

भारतसन्तान-वासनारूपिणी
आशाकोटि-नित्योन्मेषिणी
त्वं मातर्गैरिक-रूपिणी ॥१००॥

द्युतेस्तव ललित-लावणी
ज्ञान-तपः-सेवा-सूचनी
त्याग-वीर्य-दीक्षादायिनी
कर्मप्रचोदनी ॥१०१॥

सन्ताने भव करुणाकारिणी
शौर्य-वीर्य-नित्यप्रसाधिनी
पताका गैरिकशोभिनी ॥१०२॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

देशमातृका-बिजयबोधिका
गणकोटि-मिलन-साधिका
जननी नो गैरिकपताका ॥१०३॥
मातृमान-सतत-रक्षण-पताका-शिरोनभोलेहन-
बद्ध-परिकरा वयं सन्तानाः शान्तिविधायकाः।
गृहीत-पुण्यशपथा धर्म्य-कर्मसञ्जीवकाः ॥१०४॥

राज्ञी। देशरक्षिण्यो जनन्यः! अद्य समायातोऽस्माकं नारीणां परीक्षणसमयः।

त एते वैदेशिक-शत्रवो हिंसाद्वेष-कलुषितानां देशीय-शत्रूणां साहायकेन भारतवर्षं निगड़बद्धं कर्तुं यतन्ते। किन्तु अस्माकम् आमरणं नैते तत्करणे समर्था भविष्यन्ति।

वयं घातं घातं शत्रून् निहनिष्यामः पातं पातं भूतले पातयिष्यामः; धूलिषु लुठन्त्योऽपि वयं धूलिसात् करिष्यामस्तान्। घोररणरङ्गिण्यो वयं, तान् रणरङ्गखेलां दर्शयिष्यामो ध्रुवम्।

[तत उल्लम्फनपूर्वकं प्रविशन्ति दुर्गमध्ये ब्रिटिशसैनिकाः। अश्वखुरशब्दाः सैन्यकोलाहलध्वनयश्च दिगन्तं मुखरयन्ति।]

ब्रिटिशसेनाध्यक्षः। (कञ्चन ब्रिटिश-सैनिकमुद्दिश्य) ह्यारि! प्राथम्येन एष कृष्णवर्ण-वायसराजः पशुमारं मारयितव्यः। लोभातुरो नराधम एष उत्तरोत्तर-लोभाक्रान्तोऽस्मानपि कदाचित् विपन्नान् करिष्यति।

ह्यारि। तथा। (दुलाजिठक्कुरम् अस्त्रविद्धं करोति।)

दुलाजि। हा हतोऽस्मि। अहो अधन्या गतिर्लोभातुरस्य।

(मृतः शेते।)

[ततो मुष्टामुष्टि शस्त्राशस्त्रि घोरं युद्धं प्रवर्तते।)

लक्ष्मीदेवी। अहो! आग्नेयास्त्रचूर्णकगन्धैः परिपूरिता दश दिशः। मुहुर्मुहुर्गर्जति "घनगर्जन" समाख्याग्नेयास्त्रं मम, तथा अन्यान्यपि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

अस्त्राणि। शतशो जनाः प्राचीरमुत्क्रम्यान्तः प्रविशन्ति। तत् किमिदानीं करिष्ये? दुर्गत्यागम्? ततो मरणमपि मे वरम्।

(राज्ञी बहून् शत्रून् मारयति, किन्तु तेषां निरन्तरसमागमात् निरुत्साहा जायते।)

भो विधातः! देहि मे शक्तिं शत्रुकुलविनाशाय।

अन्याय्याचरणं हृदापि न मया सञ्चिन्तितं कर्हिचिद्
वंशस्योन्नति-साधनाय यतितं राष्ट्रस्य चाप्यन्वहम्।
कृत्यं भारतसन्ततेः समुचितं संसाध्य सांग्रामिकं
यन्मृत्युर्व्रियते तदेधि भगवन् पुत्र्यां प्रसन्नो मयि॥१०५॥

[कठोरमाक्रामति शत्रुपक्षः]

लक्ष्मीः। (नारीवाहिनीमुद्दिश्य) कुलरत्न-देशपावना मातरः! आत्मानं कठोरं नियोजयध्वं समरे। समय एष जीवन-सार्थक्य-सम्पादनाय। क्षत्रियाणां युद्धमृत्युरेव धर्मः।

शत्रूणां पातयित्वा शतमवनितले तच्छवास्तीर्णशय्या-
मध्यासीना हि वीरा रणशिरसि तनुत्यागतो यान्ति मुक्तिम्।
क्षत्राणामेष धर्मो न तु विकलतनोर्व्याधिभिर्गेहमृत्यु-
स्तत् किं लीना रणाग्रान्मलिनयथ यशो जन्मभूमिञ्च धर्मम्॥१०६

किञ्च, सम्मुखयुद्धे मृत्युर्न मृत्युरेव। तथाहि—

भित्त्वाऽरिमण्डलमपासुरपि प्रवीरो
भूयो भिनत्ति यदयं रविमण्डलञ्च।
तज्ज्ञापयत्यभिमुखं द्विषतां स्थितस्य
वीरस्य नास्ति मरणं समरे कदाचित्॥१०७॥

अत एवेदानीं स्मरत तामेव दुःखकोटिनाशिनीं मातरम्। या हि

घने घोरे रणे दारुणे वैरिमध्ये
सागरे दुस्तरे प्रान्तरे चान्तहीने
कालिका गतिरेका निस्तारहेतुः।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(अन्यतः प्रविशति कश्चन ब्रिटिशपक्षीयः ।)

ब्रिटिशपक्षीयः । अहो कष्टम् अस्माकं परमवीरः कर्णेल-टार्णवुल्-महोदयः दारितोदरो धरायां शेते । (अन्यतो विलोक्य) हा धिक् हा धिक्, अदूरे दृश्यते मृतराशिषु लेफ्टेनेन्ट् माइक् ले-जोहनमहोदयः । तत् मर्त्य-लोकात् सर्वथा अपसारणीया इयं दुश्चक्रजालविस्तारिणी "घनगर्जन" शोभना नारी । (इति लक्ष्म्या अभिमुखमायाति)

(आगच्छन्तम् एनमाहत्य लक्ष्मीदेवी भृशं श्वसिति ।)

लक्ष्मीः । अहो शत्रुकुलं सामयिक-भावेन मया प्रशमितं न तु दूरीकर्तुं शक्यते । भूयोऽपि शत्रवः प्रचण्डतर-वेगेनास्मान् आक्रमिष्यन्त्येव । मम सेनापतयो निहताः, नारीवाहिनी च पर्याकुलीकृता । भवतु स्वल्पसैनिक-सहायैव योत्स्ये । (प्राग्रेसरीभवन्ती आर्तनादं श्रुत्वा नेपथ्याभिमुखी) अहो किं नु करिष्यामि ? शत्रवो मम झान्सी-राज्यस्य प्रशस्ततमां पल्लीं ज्वालयति ।

पल्लीं समृद्ध-जनताध्युषितां मतल्लीं
चारु-प्रकल्प्त-विपणापण-सन्निवेशाम् ।
सोपस्करामनपसारित-बाल-वृद्धां
हिंस्रा अनादृत-सदाचरणा दहन्ति ॥१०८॥

रे रे पापाचार-परायणाः !

यदिह किमपि वैरं तत्र भूपोऽपराधी
सह समर-सहायैः सैनिकानां समूहैः ।
अविदित-रणवार्तान् किन्नु पल्लीजनौघान्
दहथ वितथ-रोषान्नैष संग्रामधर्मः ॥१०९॥

तदिदानीम् आत्मविनाश एव सर्वथा करणीयः । कः पुनर्भृशं पर्याकुल इत आयाति ।

(प्रविशति पञ्चसप्तति-वर्षवयस्कः कश्चन युद्धनेता)

युद्धनेता । (राज्ञ्याः करं धृत्वा) मातः ! अशान्तता न त्वयि

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

युज्यते। विधातृ-वासनया घटितो नगरदाहः। कर्मफलं कदापि नातिक्रमणीयम्। किन्तु आत्महत्या कथमपि न कार्या। वीर्यवती रमणी त्वम्। भारत-जननी पुनरद्य त्वद्वदनमात्रावलोकनेन प्राणान् धारयति। पश्यतु जननी—

एकैकशो म्लायति भारतीये
भूप-प्रदीपे ब्रिटिश-प्रतापात्।
प्रायान्धकारे भवदेक-दीपा
हा देश-माता क्रमते कथञ्चित् ॥११०॥

काल्पिनगरे पेशोया आस्ते, एतां नगरीं परित्यज्याविलम्बमस्माभिस्तत्र गन्तव्यम्। तस्मात् स्थानात् पुनरप्यस्माभिर्योद्धव्यम्।

लक्ष्मीः। आर्य! पितुरुपदेश इव भवतो वचनमिदं मह्यं प्रतीयते।

युद्धनेता। पुनश्च मातः! साम्प्रतिक-विपर्ययार्थमपि त्वया न शोचनीयम्। कुतः

जये पराजये वापि स्वविक्रम-विकाशनात्।
समं स्मरिष्यसे मातर्भारतीयैस्त्वमन्वहम् ॥१११॥

आस्ते च तव शिशुपुत्रो दामोदरः, सोऽपि त्वया रक्षणीयः। अत एव योद्धृरीत्या स्थानान्तराश्रयणमस्माकं वरम्।

लक्ष्मीः। आर्य! अवश्यग्राह्यं भवतो वचनम्। तद् भवतु भवदभिप्रेतमेव।

(समाप्तमष्टम-दृश्यम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

नवम-दृश्यम्

स्थानम्—झान्सीदुर्गम्।

कालः—रात्रिः।

[वस्त्रखण्डेन दशमवर्षीयं पुत्रं पृष्ठे बद्धा राज्ञी झान्सीराज्यं परित्यज्य गच्छन्ती पथि वैदेशिक-शत्रून् पराजित्य गोयालियर-दुर्गं प्रति गच्छति।]

(प्रविशति वर्मपिहिता श्वेताश्वारूढा असि-रिभलवार-भूषितकटिः सपितृका कतिपयाफगान-सैन्य-समन्विता पृष्ठावलम्बित-पुत्रा राज्ञी लक्ष्मीः, मन्दार काशी च।)

मन्दार। प्रियसखि! दुर्गद्वारसमीपं समागता वयम्। अदूरे तव प्रियः श्वेताश्वः सुसज्जितः करोति ह्रेषारवम्। सखि! तव विजययात्रा भवतु सफला।

लक्ष्मीः। विजययात्रा! अपि समयोऽयम् उपहासस्य? प्राणप्रियं झान्सीराज्यं परित्यज्य निर्लज्जेव यामि स्थानान्तरम्। इतोऽधिकं किं स्याद् दुःखकरम् अरुन्तुदं वा?

काशी। देवि! नहि परिहास-जल्पितमेतत्। वीररमणी-शिरोमणिः खल्वस्माकं महाराज्ञी। अत एव दुलाजिठक्कुर-विश्वासघातकतया शत्रूणां दुर्गप्रवेशानन्तरमपि देवी न पराजयं स्वीकृतवती परन्तु स्थानान्तरमपि याति संग्राम-परिचालनार्थम्। अत एव विजयोऽस्माकम् अवश्यमेव भविष्यति, तत्र नास्ति कश्चन सन्देहः।

लक्ष्मीः। प्रिये काशि! युष्माकं मङ्गलकामनया श्रीश्रीमहालक्ष्मी-कृपया च तथा आस्ताम् इति प्रार्थये।

अये श्वेताश्व! बहोः कालात् त्वं मां कल्याण-पथे परिचालितवानसि, तदद्यापि तथा कुरु।

(पृष्ठबद्धं पुत्रमुद्दिश्य) अये नयनमणे मम! त्वां स्वपृष्ठे निधायाहं

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्यस्थानं यामि, इदानीमेतदेव मम पृष्ठं तव राजासनं भवतु। मयि जीवन्त्यां न कोऽपि शक्ष्यति त्वाम् इतोऽपसारयितुम्।

दिवं याते दैवान्मम जठरजे राज-तनये
गृहीतस्त्वं पत्या सदृश-कुलजो दत्तकतया।
दशा दुःस्था कीदृङ् मयि वत मृतायां तव भवे-
दसौ चिन्ताऽत्यन्ता मम हि हृदयं कृन्ततितराम् ॥११२॥

अपि च—

हितार्थं ते राज्ञा यदिह यतितं जीवन-पणं
पणीकृत्य प्राणानहमपि यदद्यापि च यते।
विलोके नैकस्याप्यहह! फलमल्पं यदरयो
बलीयांसो राज्यं सकलमपि हर्तुं व्यवसिताः ॥११३॥

प्रार्थये, अस्माकं सर्वेषां पुण्यफलेन त्वं दीर्घजीवी सुखी च भव।

जन्मिनां मरणं लोके बाध्यते न कदाचन।
केवलं मरणं नास्ति परार्थं कर्म कुर्वताम् ॥११४॥

राजसन्तानस्त्वं राजोचितं जीवनं यापयेति प्रार्थना।

(नेपथ्ये कोलाहलः। वेगेन प्रविशति गुल्मुहाम्मदः।)

गुल्मुहाम्मदः। राज्ञि, शत्रुपक्षीया अस्मान् न केवलम् अनुसरन्ति सन्निकर्षं पुनः समायाताः। तद् युद्धायादेशं ददातु भवती।

लक्ष्मीः। अयि वत्साः! ऋजुका इव किमेवं भणथ?

शस्त्राभ्यासं गते शत्रौ कृतमादेश-याच्ञया।
नापेक्ष्याऽनुमतिर्भोक्तुमन्ने सम्मुखवर्तिनि ॥११५॥

(गुल्मुहाम्मदो निष्क्रान्तः)

(राज्ञी असि-चर्मणी गृहीत्वा ससज्जा तिष्ठति)

(प्रविशति कश्चन शत्रुपक्षीयः)

लक्ष्मीः। अरे वैदेशिक-शत्रो! रमणीति कृत्वा मां क्षीणबलां कल्पयसि? तद् गच्छ यमालयम्। (असिना तं पातयति।)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(ततः प्रविशन्ति अन्येऽपि शत्रुपक्षीयाः सैनिकाः ।)

लक्ष्मीः । (स्वजनानुद्दिश्य) सर्वे भवन्तो मामनुगच्छन्तु । मयि जीवन्त्यां नास्ति वः किमपि भयम् । (शत्रून् उद्दिश्य) अये परस्वापहारकाः दस्यवः ! पश्यत भारतीय-ललनाया विक्रमम् ।

(शत्रुभिः सह युद्धम् । बहवः शत्रवो मृताः ।)

लक्ष्मीः । (स्वजनान् प्रति) बन्धवः ! बद्धपरिकरा वयं चतुर्विंशति-होराभ्यन्तरे काल्पिनगरे राओसाहेब-पेशोया-महोदयस्य प्राप्तुं सन्निधिम् । पुनरपि तत्रास्माकं नवयुद्धं दुर्गाधिकारहेतोः प्रचलिष्यति ।

(मोरोपन्तमुद्दिश्य) पितः ! यदि तातियातोपे-महोदयेन बाहुल्ये-नाग्नेयास्त्रादीनि नाभविष्यन् परित्यक्तानि अस्माकं जयलाभेऽपि बाधा नाभविष्यत् । तथापि, यदि निजाम-प्रभृतयो मम सहायका अभविष्यन् ! अथवा कः शक्नुयान्नियतिमुल्लङ्घयितुम् ।

मोरोपन्तः । तत् सत्यं मातः ।

सर्वान्तर्द्वन्द्व-दौस्थ्यं सकलमपि भयं स्वार्थ-सन्धिञ्च हित्वा
छत्रच्छायां श्रयन्तस्तव यदि मिलिता भारतीया भवेयुः ।
किंवीर्यास्ते कियन्तः परविषय-परास्कन्दिनः श्वेतधूर्ता
गच्छेयुर्ये न सद्यः स्वविषयमचिराद् भारताशां विसृज्य ॥११६॥

खण्डशोऽत्र तत्र केचन युध्यन्ते, सैनिकाश्च न सुसंहताः विशेषतो नेतृविहीनाः ।

हिउरोज्महोदयेन तु वाष्पीयशकटयोगेन बोम्बे-प्रभृतिप्रदेशेभ्यो युद्धोप-करणान्यानीयन्ते ।

लक्ष्मीः । पितः ! सत्यं तत् । कतिसंख्यका वा विदेशिनः समागताः भारतवर्षे ? श्रूयते निखिल-ब्रिटानीयायां लोकसंख्या अस्माकं भारतवर्षस्य प्रदेशस्यैकस्यापि लोकसंख्याया न्यूना इति ।

किञ्च, युद्धविद्यायामपि न खलु न पारदर्शिनो वयम् । तथापि वयं बहुशतवर्षेभ्यः पराधीनतां भजामः केवलं स्वजनद्रोह-चरितार्थताहेतोः ! अहो

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

कदा नु देशोऽयं जागरितो भविष्यति, ज्ञास्यति च निपुणं भ्रातृमेलनस्याननुमेयशक्तिम्, पूजयिष्यन्ति च भारतसन्तानाः सर्वे देश-जननीं जननीरूपेण।

परस्पर-द्वेष-विनष्टबुद्धयः
स्वघाति-युद्ध-क्षत-शक्तिसम्पदः।
कदा नु सौभ्रात्र-बलोपबृंहिताः
समुद्धरामो धरणीं स्वजन्मनः ॥११७॥

परिचारिका। (प्रविश्य) मातः! राजकुमारः क्षुत्पीड़ित इव लक्ष्यते।

लक्ष्मीः। दुर्गे! तद्विषये अवधानम् इतः प्रभृति त्वयैव देयम्। त्वमस्य तृतीया जनन्यसि। अत एव

आद्या सवित्री परतो ग्रहीत्री
माताऽस्ति धात्री भवती तृतीया।
त्रैमातुरत्वं विधिना प्रणीतः
स्यादेष रामानुज-वीर्यसारः ॥११८॥

बाल्यात् प्रभृति त्वमेनं स्वपुत्रवत् पालितवती। जाने, इदानीमपि त्वमस्य कल्याणकारिणी भविष्यसि। तथापि स्नेहाद् वदामि—

त्यक्तः प्रथमया पूर्वं त्यज्यमानो मयाऽधुना।
पूर्वतोऽप्यधिक-स्नेहात् त्वयाऽयं परिपाल्यताम् ॥ ११९॥

जानामि—जगति न कोऽपि भवति कायेन चिरजीवी, शक्नोति तु कर्मणा चिरं जीवितुम्। मम पुनः आदर्शस्थापनमेव जीवनस्य परं व्रतम्। यदि मम जीवनादर्शेन भारतीय-ललनाः सहस्र-सहस्र-कण्ठैः मातृनाम समुच्चारयन्ति, यदि मातरं सत्यं सेवन्ते, भ्रातृद्रोहं विस्मरन्ति—तदैव मम जीवनं सार्थक्यमवाप्स्यति। किञ्च, मम जीवनं दीर्घं कदापि न भवितुम् अर्हति। अत एव मम पिता तथा च त्वं पुत्रस्य मम संरक्षण-तत्परौ भवतम् इति समाशंसा।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

मोरोपन्तः। दुहितः! राओसाहेब-पेशोया-महोदयस्तव बाल्यबन्धुः, अस्मासु परमस्नेही च। भगवत्कृपया तद्गृहे समुचित-समादरं निश्चितं वयं लप्स्यामहे।

लक्ष्मीः। तद्विषये कः सन्देहः? तथापि

एते ये दीर्घकालात् कृत-गुरु-दुरिताः कोटयो भरतीयाः
प्रायश्चित्ताय तेषामिह रणदहने यद्यहं स्यां न दग्धा।
निद्राणानाममीषां कथमिव भविता तर्हि सम्यक् प्रबोधो
येनोत्पाठेयत देशाद् ब्रिटिश-नरपतेः शासनं स्वैरतन्त्रम् ॥१२०॥

जनन्या गान्धार्या यथासीद् दशा, ममापि तथा भविष्यति ध्रुवम्। कोटि-दुरन्त-दुर्योधनदोषो भारतवर्षं कलुषीकरोति! अहं गान्धारी-जननीव यदा दारुण-युद्ध-दावानले विदग्धा भविष्यामि तदैव देशस्य प्रबोधो भविष्यति चिराय।

मन्दार। प्रियसखि! अतिक्रामति कालः। शुभ-यात्रापथे कुरु प्रथम-पादक्षेपम्। यद्यपि दुर्गस्य स्थानविशेषे एव वर्तते शत्रूणाम् अधिकार-स्तथापि गुप्तचरा राजन्ते सर्वत्र।

लक्ष्मीः। सत्यमाह सखी। एषाहं गच्छामि। यूयमपि विलम्बनं न कुरुध्वम्, द्रुतं मामनुसरत।

काशी। श्रीकालिका भवतु तव सहायः। देशजननी आशीर्वचोभि-स्त्वामभिनन्दयतु।

चिमावाई। नयनमणे पुत्रि लक्ष्मि! त्वं स्वयमेवासि सौन्दर्याधि-ष्ठात्री देवी लक्ष्मीः। तव सौन्दर्यं न केवलं देहे, परम् आत्मनि प्रेम्णि त्यागे च तत् सममेव विद्यते। तथा तवैश्वर्यमपि न केवलं धने किन्तु आत्मनि, बले, स्वार्थलेशहीनतायाम् आत्मनिर्भरशीलतायाञ्च।

जीवनसर्वस्व कन्यके! त्वं विजयिनी भव। सत्यं यथाऽसत्यम्, आलोको यथाऽन्धकारम्, अमृतं यथा मृत्युं दूरीकरोति तद्वत् त्वमपि शत्रून् दूरीकुरुष्व।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीः। मातः! तवाशीर्वादः सकलो भवतु। अहो! कोनु खलु गायति?

(प्रविशति गायन् चारणकविः।)

परिहर गुरु-परितापम्।
क्षयमुपयास्यति दुःख-तिमिरतति-
रुत्सृज करुण-विलापम् ॥१२१॥
आत्मकलहरत—मङ्ग-तनयशत-
मेष्यति चिरमनुतापम्।
यास्यति दूरं घनान्धकारं
दास्यति सविता तापम् ॥१२२॥
मैत्र-बलोर्जित—मर्दित-भारत-
मुज्झति यद्युपजापम्।
स्वकीय-कण्ठाद् ध्रुवमुच्छिन्द्याद्
दुर्जन-बन्धन-शापम् ॥१२३॥
साधन-सम्पत् प्रसरतु तावत्
स्फुरतु हृदयमपपापम्।
दीन-जनेशो दयतादीशो
दवयतु दुर्गत-तापम् ॥१२४॥
तव बहु-विश्रुत-सन्तत-सञ्चित-
मूर्जित-कीर्ति-कलापम्।
गास्यति जनता धरणौ विततां
दास्यति भक्ति-निवापम् ॥१२५॥

(सर्वेषां प्रस्थानम्)

(नवम-दृश्यं समाप्तम्)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

दशम-दृश्यम् (अन्तिम-दृश्यम्)

[राज्ञी पुरुषवेशा 'गोयालियर् कन्टिन् जेन्ट' सैन्यवत् श्वेताधोवस्त्र-(पाजामा) रक्तवर्णोर्ध्वावरण (कुर्ता) भूषिता। तस्याः कण्ठे मुक्ताहारः, पादयुगले उपानहौ मस्तके च श्वेतवस्त्रावरणम्]

(राज्ञी लक्ष्मीदेवी, रघुनाथसिंहः, गुलमुहाम्मदः, गृहीत-पुरुष-नेपथ्या मन्दार्, रामचन्द्र-देशमुखः दामोदरः, शत्रुपक्ष-सैन्यचालकौ मेजर-भायेलस् तथा च रेइनेस्, उभय-पक्षीय-सैनिकाश्च।)

स्थानम्—गोयालियरस्थ-फुलवाग्प्यारेड्-प्रान्तरम्।

कालः—प्रभातम्।

(प्रविशति लक्ष्मीदेवी मन्दार च।)

लक्ष्मीः। मन्दार! सुख-दुःखसमव्रतिनि! करस्पर्शपूर्वकं मामालिङ्ग। देश-मातृका-यज्ञस्य पूर्णाहुतिदिवसोऽयमिति मन्ये। अस्मिन् गोयालियरस्थ-फुलवाग्प्यारेड्-प्रान्तरे अस्माकं भाग्यनिर्णयो भविष्यति। सति प्रयोजने प्राणविसर्जनम् अवश्यमेव करणीयम्।

मन्दार। प्राणसखि! त्वमसि कायः अहं छाया। तव पन्था एव ममापि पन्थाः। त्वां विहाय अहं कदापि न जीविष्यामि। यदि शत्रून् पराजित्य त्वत्सहकारिणी युद्ध-क्षेत्रे एव प्राणान् त्यक्तुं शक्नुयाम् तदैवात्मानं धन्यधन्यं परिगणयिष्यामि।

लक्ष्मीः। सखि! तन्निर्भयं प्राग्रेसरीभवावः। "हर हर बमम् बमम्"। अये इत एवायाति सेनापतिरस्माकं सिंहविक्रमो रघुनाथसिंहः। तदावां प्रच्छन्ने भवावः। (तथा कुरुतः)

(प्रविशति रघुनाथसिंहः)

रघुनाथः। भो मम प्राणप्रियतमाः सैनिकाः! प्राणपणं कृत्वा युद्धं कुरुत। "वयं विजयं लप्स्यामहे अथवा धूलिराशौ विलीना भविष्यामः"

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

इति प्रतिजानीत। विजयोऽवश्यमेवास्माकं भविष्यति। राज्ञी महोदया च पश्चाद्भागे अस्माकं वर्तते। (प्रतिष्ठते।)

(ततः प्रविशति युद्धरतो मेजर् भायेलस्)

मेजर्। भोः सैनिकाः! वयम् इदानीम् एकान्त-सन्निकृष्टा जाताः शत्रुसैन्यस्य। तत् कुरुत नालिकास्त्र-विस्फोरणं मुहुर्मुहुः, भारतवर्षे विद्रोहिणां प्रशमनं भवतु।

(नेपथ्ये मुहुर्मुहुः "हर हर बमम् बमम्" शब्दः।)

मन्दार। (प्रविश्य) अहो अद्य युद्धे बहून् शत्रूनहं निपातितवती। इदानीं मरणेऽपि नास्ति मे दुःखम्। सैनिकप्रवरा मा मा श्लथ-प्रयत्ना भवत।

मेजर्। को न्वेष नारीलावण्य-विमण्डितो योद्धा? अयम् एक एव शतमस्मत्पक्षीयान् मारितवती मारयति चान्यान्। तदेष झटिति हन्तव्यः। (नालिकाद् गोलकं मुञ्चति।)

मन्दार। (गोलकविद्धा) अहो राज्ञि चिरसहचरि! त्वां त्यक्त्वाहमद्य गच्छामि दूरदेशम्। किन्तु मा त्वं श्लथप्रयत्ना भव।

(प्रविश्य लक्ष्मीः प्रचण्डविक्रमेण मन्दारहन्तुर्वधं साधयति।)

लक्ष्मीः। जन्म-जन्मान्तर-प्राणसखि! त्वदर्थम् अश्रुपातोऽद्य मम मा भूत्। परम-सौभाग्यवती त्वं रणाङ्गने देशहिताय गोलकविद्धा जहासि प्राणान्। तव पदाङ्कानुसरणेन वयमपि धन्यधन्या भविष्यामः।

(शत्रुपक्षीयाः राज्ञीमाक्रामन्ति। राज्ञी दशन-पंक्तियुगलेनाश्वस्य रश्मिं संयम्य हस्ताभ्यामसिद्वयं घूर्णयन्ती युध्यमाना निष्क्रान्ता।)

(प्रविशति ससैन्यो रघुनाथसिंहः।)

रघुनाथः। अहो पश्यत पश्यत! अस्माकं राज्ञी लक्ष्मीदेवी स्वयं श्रीकालिकावद्युध्यते। अत्याश्चर्यम् अद्भुतम्!

प्रगृह्य दन्तैर्हय-रश्मि-रज्जुं
विधृत्य चासिद्वितयं कराभ्याम्।
इयं रिपूनापततो निहन्ति
स्वदेह-रक्षा-निरपेक्ष-चर्या ॥१२६॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

तद् वयमस्याः पृष्ठचरा भवामः। "हरहर वमम् वमम्"।

(प्रविशन्ति शत्रुपक्षीयाः केचन।)

कश्चित् शत्रुपक्षीयः। अहो को न्वेष यौवन-पाददेशे स्थितोऽपि सिंह इव मृगान् अस्मत्पक्षीयान् नाशयति? ततोऽस्य वधार्थं सर्वथा प्रयतितव्यम् अस्माभिः।

रघुनाथसिंहः। एते केचन वैदेशिक-शत्रवः। एतान् यमालये प्रेरयामः। (शत्रूणां पलायनम्)। दूरं गच्छत भीरवः! एवमेव नचिराद् भारतादपि दूरीभविष्यथ।

(इतस्ततो विलोक्य) अहो कष्टम्! इत एवास्माकं राज्ञी गोलक-विद्धा मुह्यन्ती वर्त्तते। हन्त! भारतीय-श्रेष्ठवीराङ्गनेयं समराङ्गणे दुर्धर्ष-शत्रुभिः सह युध्यमाना प्राणान् विसृजति अकातरम्। देशमातृकायाः पूत-यज्ञवेदीमूले आत्माहुतिर्दत्ता महाराज्ञ्या। भवन्तः पश्यन्तु, विश्ववासिनः पश्यन्तु।

गुलमुहाम्मदः। हा हताः स्मः। सर्वस्वमपहृतमस्माकं, देहादस्माकं प्राणा विनिर्गताः। (उच्चै रोदिति)

रघुनाथसिंहः। योद्धृवर गुलमुहाम्मद-महोदय! न भवान् अश्रूणि विसृजतु। अस्या महाप्राणाया महीयस्या ओजस्विनी गाथा शाश्वतकालं व्याप्य पृथिव्याः प्रतिरन्ध्रमनुरणिष्यति, सागर-वक्षसि कल्लोलिता भविष्यति, वायोः प्रतितरङ्गं शब्दायमाना चिरं विचरिष्यति। अस्माकं क्षुद्रा झान्सी पुरी तस्या महागौरवं स्ववक्षसा धारयन्ती महामहिमान्विता चिरगौरविणी च भविष्यति।

सर्वे। जयो लक्ष्मीराज्ञ्या जयः। जयो भारत-मातृकाया जयः।

(प्रविशति दामोदरेण सह रामचन्द्र-देशमुखः।)

रामचन्द्रः। अहो! सत्यमेव राज्ञी अस्माकं गोलकविद्धा शोणितास्रुत-देहा वर्तते। हा हताः स्मः। दामोदर! मातरं तव कुरु आलिङ्गनबद्धम्। न सा त्वां त्यक्त्वा दूरं यातुं समर्था भविष्यति।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

लक्ष्मीः। प्राणप्रिय आनन्द! मत्पार्श्वमेहि।

(दामोदरः करुणं विलपन् मातरमालिङ्गति।)

लक्ष्मीः। अत्र भवन्तः सर्वे तथा कुर्वन्तु यथा ममानन्द आनन्दरहितो न भवेत्। यथा प्राक् मह्यं तथेदानीम् अस्मै अपि स्नेहः प्रकटनीयः। किञ्च, ममैते सैनिका राजकोषस्थ-धनेन यथासम्भवं प्रतिपालयितव्याः।

दामोदरः। मातः! मदर्थं न त्वया चिन्ता करणीया। निश्चित-महमेतेषां साहायेन तवानुसृतं व्रतं पालयितुं यतिष्ये।

तनयो मातुराशीभिर्मोदते नितरां भुवि।
तस्याः पदाङ्कगामी स जायते विश्ववन्दितः ॥१२७॥

केवलम् आशीर्भिर्मां धन्यं कुरु।

रामचन्द्रः। आनन्दस्य परिपालनभारः सर्व एव मया सानन्दं गृह्यते। मातः! वीतचिन्ता भव। राम राम हरे हरे!

सर्वे। राम राम हरे हरे।

(प्रविशन् गायति कश्चन चारणकविः)

महा-महीयसी लक्ष्मीः सती
यां विहाय नास्माकमन्या गतिः।
वदति "स्थिरा मे झान्सी-स्थितिः"
स्वयं विग्रहिणी युद्धरीतिः ॥१२८॥
नालिक-गोलकैरस्याः प्राणक्षतिः।
यावद् भारत-प्राणायति-
स्तावल्लक्ष्मीयशोगीतिः ॥१२९॥

लक्ष्मीः। प्राणप्रिय-सांग्रामिक-सहचराः! मा भवत यूयं शोक-पर्याकुलाः। देशमातृकाहेतो रणभूमौ प्राणत्यागात् किमन्यद् वरणीयं स्यात्। स्वाधीनताहीनस्य जीवनेन किम्? यदि माता भवति निगड़-बद्धा सन्तानाः कथं मसीपरिवृत-वदनानि लोकसमाजे प्रदर्शयेयुः! (असिं संप्रसार्य)

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

प्राणप्रतिम-बन्धवः ! भूयोऽपि भवद्भिः शपथो ग्रहणीयः । मम शेषनिःश्वास-ग्रहणतः प्रागेव भवद्भिः सर्वैः मदीयासि-स्पर्शनपूर्वकं उच्चैः प्रोद्घोष्यताम्—

"भोः परम-गौरवमयि देशजननि ! तव महापूजायाः परम-शुभक्षणेऽस्मिन् वयं तव सन्तानाः—देशप्रीति-भक्ति-सेवा-त्याग-तपस्या-रूप-पञ्च-पुष्पैः, पवित्रता-स्वार्थहीनता-मैत्री-वीर्य-शान्तिरूपैः पञ्चप्रदीपैश्च तव पूजां सम्पादयिष्यामः" इति ।

सर्वे । वयं जीवनपणैः जननी-समारब्ध-मातृपूजामिमां सम्पादयिष्यामः ।

रामचन्द्रः । तत् सर्वं भविष्यति देवि ! मातः ! इतोऽभ्यधिकं किमपि ते प्रियं कर्तुं शक्नोमि ?

लक्ष्मीः । इतोऽपि किं प्रियं स्यात् ? तथापीत्थमस्तु—

भारतजननी विश्वमोहिनी मैत्रीबलविवर्धिनी
प्रेममोहिनी धर्मव्रतिनी जयतु मङ्गलकारिणी ।
अहिंसा-शान्ति-वीर्य-प्रीति-सत्य-सेवाविधायिनी
करोतु सततं धरित्रीहितं विश्वमातृविनोदिनी ॥१३०॥

ओं शान्तिः ओं शान्तिः ओं शान्तिः ।

(समाप्तं दशम-दृश्यम्)

॥ समाप्तञ्चेदं भारतलक्ष्मी-नाटकम् ॥

———

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Available from
PRACYAVANI 3, Federation Street, Calcutt-9

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

CC-0. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha